# अध्यायः १८

# मोक्षसंन्यासयोगः

सर्वस्यैव गीता-शास्त्रस्यार्थोऽस्मिन्नध्याये उपसंहृत्य सर्वश्च वेदार्थो[1] वक्तव्य इत्येवमर्थोऽयमध्याय आरभ्यते। सर्वेषु ह्यतीतेष्वध्यायेषूक्तोऽर्थोऽस्मिन्नध्यायेऽवगम्यते।

अर्जुनस्तु संन्यास-त्याग-शब्दार्थयोरेव विशेषं बुभुत्सुरुवाच -

**अर्जुन उवाच -**

**संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।**

**त्यागस्य च हृषीकेश पृथक्केशिनिषूदन।। १८.१।।**

संन्यासस्येति। संन्यासस्य संन्यास-शब्दार्थस्येत्येतत्। हे महाबाहो तत्त्वं तस्य भावः तत्त्वं याथात्म्यमित्येतत्। इच्छामि वेदितुं ज्ञातुम्। त्यागस्य च त्याग-शब्दार्थस्येत्येतत्। हृषीकेश पृथक् इतरेतर-विभागतः। केशिनिषूदन केशि-नामा हयछद्माऽसुरस्तं निषूदितवान् भगवान् वासुदेवः तेन तन्नाम्ना सम्बोध्यतेऽर्जुनेन।। १ ।।

[1] वर्णाश्रमधर्माः।

संन्यास-त्याग-शब्दौ तत्र तत्र निर्दिष्टौ, न निर्लुठितार्थौ[2] पूर्वेष्वध्यायेषु।

अतोऽर्जुनाय पृष्टवते तन्निर्णयाय भगवानुवाच -

**श्रीभगवानुवाच -**

**काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।**

**सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।। १८.२।।**

काम्यानामिति। काम्यानाम् अश्वमेधादीनां कर्मणां न्यासं परित्यागं संन्यासं संन्यास-शब्दार्थम्,

अनुष्ठेयत्वेन प्राप्तस्याननुष्ठानं[3] कवयः पण्डिताः केचिद् विदुः विजानन्ति।

नित्य-नैमित्तिकानामनुष्ठीयमानानां सर्व-कर्मणामात्म-सम्बन्धितया प्राप्तस्य फलस्य [4] परित्यागः

सर्वकर्मफलत्यागः तं प्राहुः कथयन्ति त्यागं त्याग-शब्दार्थं विचक्षणाः पण्डिताः।

---

[2] स्पष्टौ।

[3] विधिवदननुष्ठानम्।

[4] पुण्यस्यापि।

यदि काम्य-कर्म-परित्यागः फल-परित्यागो वा अर्थो वक्तव्यः सर्वथाऽपि परित्याग-मात्रं संन्यास-त्याग-शब्दयोरेकोऽर्थः स्यात् न घट-पट-शब्दाविव जात्यन्तर-भूतार्थौ।।

**आक्षेपः**

ननु नित्य-नैमित्तिकानां कर्मणां फलमेव नास्तीत्याहुः।

कथमुच्यते तेषां फल-त्यागो यथा वन्ध्यायाः पुत्र-त्यागः।

**समाधानम्**

नैष दोषः। नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात्।

वक्ष्यति हि भगवान् अनिष्टमिष्टमिश्रं च (गी १८.१२) इति, न तु संन्यासिनाम्(गी १८.१२) इति च।

संन्यासिनामेव हि केवलं कर्म-फलासम्बन्धं दर्शयन्नसंन्यासिनां नित्य-कर्म-फल-प्राप्तिं भवत्यत्यागिनां प्रेत्य (गी १८.१२) इति दर्शयति।।। २।।

**त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।**

**यज्ञदानतपःकर्म न त्याज्यमिति चापरे।। १८.३।।**

त्याज्यं दोषेति। त्याज्यं त्यक्तव्यं दोषवद् दोषोऽस्यास्तीति दोषवत्। किं तत् कर्म बन्ध-हेतुत्वात् सर्वमेव। अथवा दोषो यथा रागादिः त्यज्यते तथा त्याज्यम् इत्येके कर्म प्राहुः मनीषिणः पंडिताः सांख्यादि-दृष्टिमाश्रिताः, अधिकृतानां कर्मिणामपीति। तत्रैव यज्ञ-दान-तपः-कर्म न त्याज्यमिति चापरे।। कर्मिण एवाधिकृताः तानपेक्ष्य एते विकल्पाः, न तु ज्ञान-निष्ठान्व्युत्थायिनः संन्यासिनः अपेक्ष्य। ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्ता (गी ३.३) इति कर्माधिकाराद् अपोद्धृता ये न तान् प्रति चिन्ता।।

**आक्षेपः**

ननु कर्म-योगेन योगिनाम्(गी ३.३) इत्यधिकृताः पूर्वं विभक्त-निष्ठा अपीह सर्व-शास्त्रोपसंहार-प्रकरणे यथा विचार्यन्ते तथा सांख्या अपि ज्ञान-निष्ठा विचार्यन्तामिति।।

**समाधानम्**

न। तेषां मोह-दुःख-निमित्त-त्यागानुपपत्तेः[5]।

न काय-क्लेश-निमित्तानि दुःखानि सांख्या आत्मनि पश्यन्ति, इच्छादीनां क्षेत्र-धर्मत्वेनैव दर्शितत्वात्।

अतस्ते न काय-क्लेश-दुःख-भयात् कर्म परित्यजन्ति।

नापि ते कर्माण्यात्मनि पश्यन्ति येन नियतं कर्म मोहात्परित्यजेयुः।

गुणानाम् कर्म, नैव किञ्चित् करोमि (गी ५.८) इति हि ते संन्यस्यन्ति।

सर्व-कर्माणि मनसा संन्यस्य (गी ५.१३) इत्यादिभिर्हि तत्त्व-विदः संन्यास-प्रकार उक्तः।

तस्माद्येऽन्येऽधिकृताः कर्मण्यनात्मविदो, येषां च मोहात्त्यागः सम्भवति काय-क्लेश-भयाच्च,

त एव तामसास्त्यागिनो राजसाश्चेति निन्द्यन्ते कर्मिणाम् अनात्मज्ञानां कर्म-फल-त्याग-स्तुत्यर्थम्।

---

[5] कर्मणः।

सर्वारम्भ-परित्यागी (गी १२.१६) मौनी सन्तुष्टो येन केनचिदनिकेतः स्थिर-मतिः (गी १२.१९) इति गुणातीत-लक्षणे च परमार्थ-संन्यासिनः विशेषितत्वात्।

वक्ष्यति च ज्ञानस्य या परा निष्ठा (गी १८.५) इति।

तस्माज्ज्ञान-निष्ठाः संन्यासिनो नेह विवक्षिताः। कर्म-फल-त्याग एव सात्त्विकत्वेन गुणेन तामसत्वाद्यपेक्षया संन्यास उच्यते, न मुख्यः सर्व-कर्म-संन्यासः।।

**आक्षेपः**

सर्व-कर्म-संन्यासासम्भवे च न हि देह-भृता (गी १८.११) इति हेतु-वचनान्मुख्य एव इति चेत्।

**समाधानम्**

न, हेतु-वचनस्य स्तुत्यर्थत्वात्।

यथा त्यागाच्छान्तिरनन्तरम् (गी १२.१२) इति कर्म-फल-त्याग-स्तुतिरेव यथोक्तानेक-पक्षानुष्ठानाशक्तिमन्तमर्जुनमज्ञं प्रति विधानात्।

तथेदमपि च न हि देहभृता शक्यम् (गी १८.११) इति कर्म-फल-त्याग-स्तुत्यर्थं वचनम्।

न सर्व-कर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते (गी ५.१३) इत्यस्य पक्षस्यापवादः

केनचिद्दर्शयितुं शक्यः।

तस्मात् कर्मण्यधिकृतान् प्रत्येव एष संन्यास-त्याग-विकल्पः।

ये तु परमार्थ-दर्शिनः सांख्याः तेषां ज्ञान-निष्ठायामेव सर्व-कर्म-संन्यास-लक्षणायामधिकारो नान्यत्र, इति

न ते विकल्पार्हाः।

तच्चोपपादितमस्माभिः वेदाविनाशिनम् (गी २.२१) इत्यस्मिन् प्रदेशे, तृतीयादौ च।। ३।।

तत्रैतेषु विकल्प-भेदेषु -

**निश्चयं श्रृणु मे तत्र त्यागे भरतसत्तम।**

**त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्त्तितः।। १८.४।।**

निश्चयमिति। निश्चयं श्रृणु अवधारय। मे मम वचनात्। तत्र त्यागे त्याग-संन्यास-विकल्पे यथा-दर्शिते भरतसत्तम भरतानां साधु-तम। त्यागो हि त्याग-संन्यास-शब्द-वाच्यो हि योऽर्थः स एक एवेत्यभिप्रेत्याह - त्यागो हीति। पुरुषव्याघ्र त्रिविधः त्रि-प्रकारः तामसादि-प्रकारैः सम्प्रकीर्त्तितः शास्त्रेषु सम्यक् कथितः।

यस्मात् तामसादि-भेदेन त्याग-संन्यास-शब्द-वाच्योऽर्थोऽधिकृतस्य कर्मिणोऽनात्मज्ञस्य त्रिविधः सम्भवति न परमार्थ-दर्शिनः इत्ययमर्थो दुर्ज्ञानः, तस्मादत्र तत्त्वं नान्यो वक्तुं समर्थः।

तस्मान्निश्चयं परमार्थ-शास्त्रार्थ-विषयमध्यवसायमैश्वरं मे मत्तः श्रृणु।। ४।।

कः पुनरसौ निश्चय इत्यत आह -

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।**

**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।। १८.५।।**

यज्ञ इति। यज्ञो दानं तपः इत्येतत् त्रि-विधं कर्म न त्याज्यं न त्यक्तव्यम्।

कार्यं करणीयम् एव तत्।

कस्मात् यज्ञो दानं तपश्चैव पावनानि विशुद्धि-कराणि मनीषिणां फलानभिसन्धीनाम् इत्येतत्।। ५।।

**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।**

**कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।। १८.६।।**

एतान्यपीति। एतान्यपि तु कर्माणि यज्ञ-दान-तपांसि पावनान्युक्तानि सङ्गम् आसक्तिं तेषु त्यक्त्वा फलानि च तेषां परित्यज्य कर्त्तव्यानीति अनुष्ठेयानीति मे मम निश्चितं मतमुत्तमम्।।

निश्चयं श्रृणु मे तत्र (गी १८.४) इति प्रतिज्ञाय पावनत्वं च हेतुमुक्त्वा एतान्यपि कर्माणि कर्त्तव्यानि इत्येतत् निश्चितं मतमुत्तमम् इति प्रतिज्ञातार्थोपसंहार एव, नापूर्वार्थं वचनं एतान्यपि इति प्रकृत-सन्निकृष्टार्थत्वोपपत्तेः।

सासङ्गस्य फलार्थिनो बन्ध-हेतव एतान्यपि कर्माणि मुमुक्षोः कर्त्तव्यानि इत्यपि-शब्दस्यार्थः।

न त्वन्यानि कर्माण्यपेक्ष्य एतान्यपि इत्युच्यते।।

अन्ये तु वर्णयन्ति - नित्यानां कर्मणां फलाभावात् सङ्गं त्यक्त्वा फलानि च इति नोपपद्यते।

अतः एतान्यपि इति यानि काम्यानि कर्माणि नित्येभ्योऽन्यानि, एतान्यपि कर्त्तव्यानि, किमुत यज्ञ-दान-

तपांसि नित्यानीति।

तदसत्। नित्यानामपि कर्मणामिह फलवत्त्वस्योपपादितत्वात् यज्ञो दानं तपश्चैव पावनानि (गी १८.५)

इत्यादि-वचनेन।

नित्यान्यपि कर्माणि बन्ध-हेतुत्वाशङ्कया जिहासोर्मुमुक्षोः कुतः काम्येषु प्रसङ्गः दूरेण ह्यवरं कर्म (गी

२.३९) इति च निन्दितत्वात्।

यज्ञार्थाद् कर्मणोऽन्यत्र (गी ३.९) इति च काम्य-कर्मणां बन्ध-हेतुत्वस्य निश्चितत्वात्।

त्रैगुण्य-विषया वेदाः (गी २.४५) त्रै-विद्या मां सोमपाः (गी ९.२०) क्षीणे पुण्ये मर्त्य-लोकं विशन्ति (गी

९.२१) इति च दूर-व्यवहितत्वाच्च न काम्येषु एतान्यपि इति व्यपदेशः।। ६ ।।

तस्मादज्ञस्याधिकृतस्य मुमुक्षोः -

**नियतस्य तु संन्यासः कर्मणो नोपपद्यते।**

**मोहात्तस्य परित्यागः तामसः परिकीर्त्तितः।। १८.७।।**

नियतस्येति। नियतस्य तु नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यते अज्ञस्य पावनत्वस्येष्टत्वात्।

मोहाद् अज्ञानात् तस्य नियतस्य परित्यागः।

नियतं चावश्यं कर्त्तव्यं त्यज्यते चेति विप्रतिषिद्धमतो मोह-निमित्तः परित्यागः तामसः परिकीर्त्तितः

मोहश्च तम इति।। ७।।

किञ्च -

**दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।**

**स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।। १८.८।।**

दुःखमिति। दुःखमित्येव यत्कर्म कायक्लेशभयात् शरीर-दुःख-भयात् त्यजेत् परित्यजेत्, स कृत्वा राजसं रजो-निर्वर्त्यं त्यागं नैव त्यागफलं ज्ञान-पूर्वकस्य सर्व-कर्म-त्यागस्य फलं मोक्षाख्यं न लभेद् नैव लभेत।। ८ ।।

कः पुनः सात्त्विकस्त्यागः इत्याह -

**कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।**

**सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः।। १८.९।।**

कार्यमिति। कार्यं कर्त्तव्यम् इत्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यते हे अर्जुन सङ्गं त्यक्त्वा फलं चैव। एतत् नित्यानां कर्मणां फलवत्त्वे भगवद्वचनं प्रमाणमवोचाम।

अथवा यद्यपि फलं न श्रूयते नित्यस्य कर्मणः तथापि नित्यं कर्म कृतमात्म-संस्कारं प्रत्यवाय-परिहारं वा फलं करोत्यात्मन इति कल्पयत्येवाज्ञः। तत्र तामपि कल्पनां निवारयति फलं त्यक्त्वा इत्यनेन। अतः साधूक्तं सङ्गं त्यक्त्वा फलं च इति।

स त्यागः नित्य-कर्मसु सङ्ग-फल-परित्यागः सात्त्विकः सत्त्व-निर्वृत्तो मतः अभिमतः।।

**आक्षेपः**

ननु कर्म-परित्यागः त्रि-विधः संन्यास इति च प्रकृतः। तत्र तामसो राजसश्चोक्तः त्यागः।

कथमिह सङ्ग-फल-त्यागः तृतीयत्वेनोच्यते? यथा त्रयो ब्राह्मणा आगताः तत्र षडङ्गविदौ द्वौ, क्षत्रियस्तृतीय इति तद्वत्।।

**समाधानम्**

नैष दोषः। त्याग-सामान्येन स्तुत्यर्थत्वात्।

अस्ति हि कर्म-संन्यासस्य फलाभिसन्धि-त्यागस्य च त्यागत्व-सामान्यम्।

तत्र राजस-तामसत्वेन कर्म-त्याग-निन्दया कर्म-फलाभिसन्धि-त्यागः सात्त्विकत्वेन स्तूयते स त्यागः सात्त्विको मतःइति।। ९।।

यस्त्वधिकृतः सङ्गं त्यक्त्वा फलाभिसन्धिं च नित्यं कर्म करोति तस्य फल-रागादिना अकलुषी-क्रियमाणमन्तः-करणं नित्यैश्च कर्मभिः संस्क्रियमाणं विशुध्यति। विशुद्धं प्रसन्नमात्मालोचन-क्षमं भवति। तस्यैव नित्य-कर्मानुष्ठानेन विशुद्धान्तः-करणस्य आत्म-ज्ञानाभिमुखस्य क्रमेण यथा तन्निष्ठा स्यात् तद्वक्तव्यमित्याह -

**न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।**

**त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः।। १८.१०।।**

न द्वेष्टीति। न द्वेष्ट्यकुशलम् अशोभनं काम्यं कर्म शरीरारम्भ-द्वारेण संसार-कारणं किमनेन इत्येवम्। कुशले शोभने नित्ये कर्मणि सत्त्व-शुद्धि-ज्ञानोत्पत्ति-तन्निष्ठा-हेतुत्वेन मोक्ष-कारणमिदम् इत्येवं नानुषज्जते तत्रापि प्रयोजनमपश्यन् अनुषङ्गं प्रीतिं न करोतीत्येतत्। कः पुनरसौ त्यागी पूर्वोक्तेन सङ्ग-फल-त्यागेन तद्वांस्त्यागी यः कर्मणि सङ्गं त्यक्त्वा तत्फलं च नित्य-कर्मानुष्ठायी स त्यागी।

कदा पुनरसौ अकुशलं कर्म न द्वेष्टि, कुशले च नानुषज्जते इत्युच्यते - सत्त्वसमाविष्टः यदा सत्त्वेन आत्मानात्म-विवेक-विज्ञान-हेतुना समाविष्टः संव्याप्तः संयुक्त इत्येतत्।

अत एव च मेधावी मेधया आत्म-ज्ञान-लक्षणया प्रज्ञया संयुक्तः तद्वान् मेधावी।

मेधावित्वादेव छिन्नसंशयः छिन्नोऽविद्याकृतः संशयो यस्य आत्म-स्वरूपावस्थानमेव परं निःश्रेयस-साधनं नान्यत् किञ्चित् इत्येवं निश्चयेन छिन्न-संशयः।

योऽधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादि-विक्रिया-रहितत्वेन निष्क्रियं आत्मानमात्मत्वेन सम्बुद्धः स सर्व-कर्माणि मनसा संन्यस्य नैवकुर्वन्न कारयन् आसीनो नैष्कर्म्य-लक्षणं ज्ञान-निष्ठामश्नुते इत्येतत् पूर्वोक्तस्य कर्म-योगस्य प्रयोजनमनेन श्लोकेनोक्तम्।।

१०।।

यः पुनरधिकृतः सन् देहात्माभिमानित्वेन देह-भृदज्ञोऽबाधितात्म-कर्तृत्व-विज्ञानतया अहं कर्त्ता इति निश्चित-बुद्धिः तस्याशेष-कर्म-परित्यागस्याशक्यत्वात् कर्म-फल-त्यागेन चोदित-कर्मानुष्ठाने एवाधिकारो न तत्त्यागे इत्येतमर्थं दर्शयितुमाह -

**न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।**

**यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते।। १८.११।।**

न हीति। न हि यस्माद् देहभृता देहं बिभर्त्तीति देह-भृत्, देहात्माभिमानवान् देहभृदुच्यते।

न हि विवेकी, स हि वेदाविनाशिनम् (गी २.२१) इत्यादिना कर्तृत्वाधिकाराद् निर्वर्त्तितः।

अतस्तेन देहभृताऽज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माणि अशेषतः निःशेषेण।

तस्माद् यस्तु अज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्म-फलाभिसन्धि-मात्र-संन्यासी स त्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण।

तस्मात् परमार्थ-दर्शिनैव देह-भृता देहात्मभाव-रहितेन अशेष-कर्म-संन्यासः शक्यते कर्त्तुम्। ११।।

किं पुनस्तत्प्रयोजनं यत्सर्व-कर्म-संन्यासात् स्यादित्युच्यते -

**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।**

**भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्।। १८.१२।।**

अनिष्टमिति। अनिष्टम् नरक-तिर्यगादि-लक्षणं इष्टं देवादि-लक्षणं मिश्रम् इष्टानिष्ट-संयुक्तं मनुष्य-लक्षणं च एवं त्रिविधं त्रि-प्रकारं कर्मणः धर्माधर्म-लक्षणस्य फलं बाह्यानेक-कारक-व्यापार-निष्पन्नं सत्, अविद्या-कृतमिन्द्र-जाल-मायोपमं महा-मोह-करं प्रत्यग्-आत्मोपसर्पि इव, फल्गुतया[6] लयमदर्शनं गच्छतीति फल-निर्वचनं, तदेतद् एवं-लक्षणं फलं भवति अत्यागिनाम् अज्ञानां कर्मिणामपरमार्थ-संन्यासिनां प्रेत्य शरीर-पातादूर्ध्वम्।

न तु संन्यासिनां परमार्थ-संन्यासिनां परम-हंस-परिव्राजकानां केवल-ज्ञान-निष्ठानां क्वचित्।

[6] तुच्छतया।

न हि केवल-सम्यग्दर्शन-निष्ठा अविद्यादि-संसार-बीजं नोन्मूलयति कदाचिदित्यर्थः।

अतः परमार्थ-दर्शिनः एवाशेष-कर्म-संन्यासित्वं सम्भवति अविद्याऽ-ध्यारोपितत्वाद्[7] आत्मनि क्रिया-कारक-फलानाम्।

न त्वज्ञस्याधिष्ठानादीनि क्रिया-कर्त्तृ-कारकाण्यात्मत्वेनैव पश्यतोऽशेष-कर्म-संन्यासः सम्भवति।। १२।।

[7] अभावप्रक्रियाया उन्मूलनमिदं वचनम्।

तदेतदुत्तरैः श्लोकैः दर्शयति -

**पञ्चैतानि महाबाहो कारणानि निबोध मे।**

**साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्।। १८.१३।।**

पञ्चेति। पञ्चैतानि वक्ष्यमाणानि हे महाबाहो कारणानि निर्वर्त्तकानि निबोध मे ममेति उत्तरत्र चेतःसमाधानार्थं, वस्तु-वैषम्य-प्रदर्शनार्थं[8] च। तानि च कारणानि ज्ञातव्यतया स्तौति - सांख्ये ज्ञातव्याः पदार्थाः संख्यायन्ते यस्मिन् शास्त्रे तत्सांख्यं वेदान्तः। कृतान्ते इति तस्यैव विशेषणम्। कृतमिति कर्मोच्यते। तस्या अन्तः परिसमाप्तिर्यत्र स कृतान्तः कर्मान्त इत्येतत्। यावानर्थ उदपाने (गी २.४६) सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते (गी ४.३३) इत्यात्म-ज्ञाने सञ्जाते सर्व-कर्मणां निवृत्तिं दर्शयति। अतस्तस्मिन् आत्म-ज्ञानार्थे सांख्ये कृतान्ते वेदान्ते प्रोक्तानि कथितानि सिद्धये निष्पत्त्यर्थं सर्वकर्मणाम् ।। १३।।

[8] Change of subject matter from vastu to karma.

कानि तानीत्युच्यते -

**अधिष्ठानं तथा कर्त्ता करणं च पृथक्विधम्।**

**विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्।। १८.१४।।**

अधिष्ठानमिति। अधिष्ठानम् इच्छा-द्वेष-सुख-दुःख-ज्ञानादीनामभिव्यक्तेराश्रयोऽधिष्ठानं शरीरम्।

तथा कर्त्ता उपाधि-लक्षणो भोक्ता।

करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृथक्विधम् नाना-प्रकारं तद्द्वादश-संख्यम्।

विविधाश्च पृथक्चेष्टाः वायवीयाः प्राणापानाद्याः।

दैवं चैव दैवमेव च अत्र एतेषु चतुर्षु पञ्चमं पञ्चानां पूरणमादित्यादि चक्षुराद्यनुग्राहकम्।। १४।।

**शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः।**

**न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः।। १८.१५।।**

शरीरेति। शरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निर्वर्त्तयति नरः, न्याय्यं वा धर्म्यं शास्त्रीयं विपरीतं वा अशास्त्रीयमधर्म्यम्। यच्चापि निमिषित-चेष्टितादि जीवन-हेतुः तदपि पूर्व-कृत-धर्माधर्मयोरेव कार्यमिति न्याय्य-विपरीतयोरेव ग्रहणेन गृहीतम्। पञ्चैते यथोक्ताः तस्य सर्वस्यैव कर्मणो हेतवः कारणानि।।

**आक्षेपः**

ननु एतान्यधिष्ठानादीनि सर्वकर्मणां निर्वर्त्तकानि, कथमुच्यते शरीरवाङ्मनोभिः कर्म प्रारभते इति

**समाधानम्**

नैष दोषः। विधि-प्रतिषेध-लक्षणं सर्वं कर्म शरीरादि-त्रय-प्रधानं, तदङ्गतया दर्शन-श्रवणादि च जीवन-लक्षणं त्रिधैव राशीकृतमुच्यते शरीरादिभिरारभ्यते इति। फल-कालेऽपि तत्प्रधानैः साधनैः भुज्यते इति पञ्चानामेव हेतुत्वं न विरुध्यते।। १५।।

**तत्रैवं सति कर्त्तारमात्मानं केवलं[9] तु यः।**

**पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः।। १८.१६।।**

तत्रेति। तत्र इति प्रकृतेन सम्बध्यते। एवं सति एवं यथोक्तैः पञ्चभिर्हेतुभिर्निर्वर्त्ये सति कर्मणि।

तत्रैवं सतीति दुर्मतित्वस्य हेतुत्वेन सम्बध्यते। तत्र एतेषु आत्मानन्यत्वेन अविद्यया परिकल्पितैः[10] क्रियमाणस्य कर्मणः अहमेव कर्त्ता इति कर्त्तारम् आत्मानं केवलं शुद्धं तु यः पश्यति अविद्वान्। कस्मात् वेदान्ताचार्योपदेश-न्यायैः अकृत-बुद्धित्वाद् असंस्कृत-बुद्धित्वात्। योऽपि देहादि-व्यतिरिक्तात्म-वादी आत्मानमेव केवलं कर्त्तारं पश्यति असावप्यकृत-बुद्धिः। अतोऽकृतबुद्धित्वाद् न स पश्यति आत्मनः तत्त्वं कर्मणो वा इत्यर्थः। अतः दुर्मतिः कुत्सिता विपरीता दुष्टा अजस्रं जनन-मरण-प्रतिपत्ति-हेतु-भूता मतिरस्येति दुर्मतिः। स पश्यन्नपि न पश्यति, यथा तैमिरिकोऽनेकं चन्द्रं, यथा वाऽभ्रेषु धावत्सु चन्द्रं धावन्तं, यथा वा वाहने उपविष्टोऽन्येषु धावत्स्वात्मानं धावन्तम्।। १६।।

---

9 *untouched by anything.*

10 आत्मानमनन्यत्वेन अविद्यया परिकल्प्य तैः क्रियमाणस्य कर्मणः इति पाठान्तरम्।

कः पुनः सुमतिर्यः सम्यक्पश्यतीत्युच्यते -

**यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।**

**हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते।। १८.१७।।**

यस्येति। यस्य शास्त्राचार्योपदेश-न्याय-संस्कृतात्मनः न भवति अहङ्कृतः अहं कर्त्ता इत्येवं-लक्षणो भावः भावना, प्रत्ययः। एते एव पञ्चाधिष्ठानादयोऽविद्यया आत्मनि कल्पिताः सर्व-कर्मणां कर्त्तारो, नाऽहं, अहं तु तद्व्यापाराणां साक्षि-भूतः, अप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः परः (मु. २.१.२) केवलोऽविक्रिय इत्येवं पश्यतीत्येतत्। बुद्धिः अन्तः-करणं यस्य आत्मन उपाधि-भूता न लिप्यते नानुशयिनी भवति। इदमहमकार्षं, तेनाहं नरकं गमिष्यामि इत्येवं यस्य बुद्धिर्न लिप्यते।

स सुमतिः, स पश्यति। हत्वापि स इमाँल्लोकान् सर्वानिमान् प्राणिन इत्यर्थः।

न हन्ति हनन-क्रियां न करोति। न निबध्यते नापि तत्कार्येणाधर्म-फलेन सम्बध्यते।।

**आक्षेपः**

ननु हत्वापि न हन्तीति विप्रतिषिद्धमुच्यते, यद्यपि स्तुतिः।।

**समाधानम्**

नैष दोषः। लौकिक-पारमार्थिक-दृष्ट्यपेक्षया तदुपपत्तेः।

देहाद्यात्म-बुद्ध्या हन्ताहमिति लौकिकीं दृष्टिमाश्रित्य हत्वापि इत्याह।

यथा-दर्शितां पारमार्थिकीं दृष्टिमाश्रित्य न हन्ति न निबध्यते इति। एतदुभयमुपपद्यते एव।।

**आक्षेपः**

ननु अधिष्ठानादिभिः सम्भूय करोत्येवात्मा, कर्त्तारमात्मानं केवलं तु (गी १८.१६) इति केवल-शब्द-

प्रयोगात्।

**समाधानम्**

नैष दोषः। आत्मनोऽविक्रिय-स्वभावत्वेऽधिष्ठानादिभिः संहतत्वानुपपत्तेः।

विक्रियावतो ह्यन्यैः संहननं सम्भवति, संहत्य वा कर्त्तृत्वं स्यात्।

न त्वविक्रियस्यात्मनः केनचित् संहननमस्तीति न सम्भूय कर्तृत्वमुपपद्यते।

अतः केवलत्वमात्मनः स्वाभाविकमिति केवल-शब्दोऽनुवाद-मात्रम्।

अविक्रियत्वं चात्मनः श्रुति-स्मृति-न्याय-प्रसिद्धम्। अविकार्योऽयमुच्यते (गी २.२५), गुणैरेव कर्माणि क्रियन्ते (गी ३.२७), शरीरस्थोऽपि न करोति (गी १३.३१) इत्याद्यसकृद् उपपादितं गीतास्वेव तावत्।

श्रुतिषु च ध्यायतीव लेलायतीव (बृ. ४.३.७) इत्येवमाद्यासु।

न्यायतश्च निरवयवमपरतन्त्रमविक्रियमात्म-तत्त्वमिति राज-मार्गः। विक्रियावत्वाभ्युपगमेऽप्यात्मनः स्वकीयैव विक्रिया स्वस्य भवितुमर्हति, नाधिष्ठानादीनां कर्माण्यात्म-कर्तृकाणि स्युः।

न हि परस्य कर्म परेणाकृतमागन्तुमर्हति। यत्त्वविद्यया गमितं, न तत्तस्य। यथा रजतत्वं न शुक्तिकायाः, यथा वा तल-मलिनत्वं बालैः गमितमविद्यया नाकाशस्य, तथा अधिष्ठानादि-विक्रियापि तेषामेव नात्मनः।

तस्माद्युक्तमुक्तं अहङ्कृतत्व-बुद्धिलेपाभावाद् विद्वान् न हन्ति न निबध्यते इति।।

नायं हन्ति न हन्यते (गी २.१९) इति प्रतिज्ञाय न जायते (गी २.२०) इत्यादि-हेतुवचनेनाविक्रियत्वमात्मन उक्त्वा, वेदाविनाशिनम् (गी २.२१) इति विदुषः कर्माधिकार-निवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा, मध्ये प्रसारितां च तत्र तत्र प्रसङ्गं कृत्वेहोपसंहरति शास्त्रार्थ-पिण्डी-करणाय विद्वान् न हन्ति न निबध्यते इति।

एवं च सति देहभृत्वाभिमानानुपपत्तौ अविद्या-कृताशेष-कर्म-संन्यासोपपत्तेः संन्यासिनाम् अनिष्टादि त्रिविधं कर्मणः फलं न भवतीत्युपपन्नम्, तद्विपर्ययाच्चेतरेषां भवतीत्येतच्च अपरिहार्यमित्येष गीता-शास्त्रार्थ उपसंहृतः।

स एष सर्व-वेदार्थ-सारो निपुण-मतिभिः पण्डितैर्विचार्य प्रतिपत्तव्य इति तत्र तत्र प्रकरण-विभागेन दर्शितोऽस्माभिः शास्त्र-न्यायानुसारेण। १७।।

अथेदानीं कर्मणां प्रवर्त्तकमुच्यते -

**ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।**

**करणं कर्म कर्त्तेति त्रिविधः कर्मसङ्ग्रहः।। १८.१८।।**

ज्ञानमिति। ज्ञानं ज्ञायतेऽनेनेति सर्व-विषयमविशेषेणोच्यते। तथो ज्ञेयं ज्ञातव्यं तदपि सामान्येनैव सर्वमुच्यते। तथा परिज्ञाता उपाधि-लक्षणोऽविद्या-कल्पितो भोक्तेति। एतत् त्रयमविशेषेण सर्व-कर्मणां प्रवर्त्तिका त्रिविधा त्रि-प्रकारा कर्मचोदना ज्ञानादीनां हि त्रयाणां सन्निपाते हानोपादानादि-प्रयोजनः सर्व-कर्मारम्भः स्यात्। ततः पञ्चभिः अधिष्ठानादिभिः आरब्धं वाङ्-मनः-कायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणादिषु संगृह्यते इत्येतदुच्यते - करणं क्रियतेऽनेनेति बाह्यं श्रोत्रादि, अन्तःस्थं बुद्ध्यादि,

कर्म ईप्सिततमं कर्त्तुः क्रियया व्याप्यमानं कर्त्ता करणानां व्यापारयितोपाधि-लक्षणः इति त्रिविधः त्रि-प्रकारः कर्मसङ्ग्रहः संगृह्यते अस्मिन्निति सङ्ग्रहः, कर्मणः संग्रहः कर्म-सङ्ग्रहः।

कर्म एषु हि त्रिषु समवैति तेनायं त्रिविधः कर्म-सङ्ग्रहः।। १८।।

अथेदानीं क्रिया-कारक-फलानां सर्वेषां गुणात्मकत्वात् सत्त्व-रजस्-तमो-गुण-भेदतः त्रि-विधो भेदो वक्तव्य इत्यारभ्यते -

**ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः।**

**प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि।। १८.१९।।**

ज्ञानमिति। ज्ञानं कर्म च कर्म क्रिया, न कारकं पारिभाषिकमीप्सिततमं कर्म, कर्त्ता च निर्वर्त्तकः क्रियाणां त्रिधा एव अवधारणं, गुण-व्यतिरिक्त-जात्यन्तराभाव-प्रदर्शनार्थम्।

गुणभेदतः सत्त्वादि-भेदेनेत्यर्थः। प्रोच्यते कथ्यते गुणसंख्याने कापिले शास्त्रे। तदपि गुण-संख्यानं शास्त्रं गुण-भोक्तृ-विषये प्रमाणमेव। परमार्थ-ब्रह्मैकत्व-विषये यद्यपि विरुध्यते तथापि ते हि कापिला गुण-गौण-व्यापार-निरूपणेऽभियुक्ता इति तच्छास्त्रमपि वक्ष्यमाणार्थ-स्तुत्यर्थत्वेन उपादीयते इति न विरोधः।

यथावद् यथा-न्यायं यथा-शास्त्रं शृणु तान्यपि ज्ञानादीनि तद्भेद-जातानि गुण-भेद-कृतानि शृणु। वक्ष्यमाणेऽर्थे मनः-समाधिं कुर्वित्यर्थः।। १९।।

ज्ञानस्य तु तावत् त्रि-विधत्वमुच्यते -

**सर्वभूतेषु येनैकं भावमव्ययमीक्षते।**

**अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्।। १८.२०।।**

सर्वभूतेष्विति - सर्वभूतेषु अव्यक्तादि-स्थावरान्तेषु भूतेषु येन ज्ञानेन एकं भावं वस्तु।

भाव-शब्दो वस्तु-वाची। एकमात्मवस्त्वित्यर्थः।

अव्ययं न व्येति स्वात्मना स्व-धर्मेण वा, कूटस्थ-नित्यमित्यर्थः। ईक्षते पश्यति येन ज्ञानेन तं च भावम्

अविभक्तं प्रति-देहं विभक्तेषु देह-भेदेषु न विभक्तं तदात्म-वस्तु, व्योमवन्निरन्तरमित्यर्थः।

तज्ज्ञानं साक्षात् सम्यक्दर्शनमद्वैतात्म-विषयं सात्त्विकं विद्धि इति।। २०।।

यानि द्वैत-दर्शनानि तानि असम्यग्भूतानि राजसानि तामसानि चेति न साक्षात् संसारोच्छित्तये भवन्ति -

**पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्।**

**वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्।। १८.२१।।**

पृथक्त्वेनेति। पृथक्त्वेन तु भेदेन प्रति-शरीरमन्यत्वेन यज्ज्ञानं नानाभावान् भिन्नान् आत्मनः पृथग्विधान्

पृथक्प्रकारान् भिन्न-लक्षणानित्यर्थः। वेत्ति विजानाति यज्ज्ञानं सर्वेषु भूतेषु।

ज्ञानस्य कर्तृत्वासम्भवाद्येन ज्ञानेन वेत्ति इत्यर्थः। तज्ज्ञानं विद्धि राजसं रजो-गुण-निर्वृत्तमित्यर्थः।। २१।।

**यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्।**

**अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्।। १८.२२।।**

यत्त्विति। यत्तु ज्ञानं कृत्स्नवत् समस्तवत् सर्वविषयमिव एकस्मिन् कार्ये देहे बहिर्वा प्रतिमादौ सक्तं एतावानेवाऽऽत्मेश्वरो वा, नातः परमस्ति इति यथा नग्न-क्षपणकादीनां[11] शरीरानुवर्त्ति[12] देह-परिमाणो जीवः, ईश्वरो वा पाषाण-दार्वादि-मात्रम् इत्येवमेकस्मिन् कार्ये सक्तम्।

अहैतुकं हेतु-वर्जितं निर्युक्तिकम्। अतत्त्वार्थवत् अयथा-भूतार्थवत्। यथा-भूतोऽर्थस्तत्त्वार्थः। सोऽस्य ज्ञेय-भूतोऽस्तीति तत्त्वार्थवत्, न तत्त्वार्थवदतत्त्वार्थवत्।

अहेतुकत्वादेव अल्पं च अल्प-विषयत्वादल्प-फलत्वाद्वा। तत्तामसमुदाहृतम्। तामसानां हि प्राणिनामविवेकिनामीदृशं ज्ञानं दृश्यते।। २२।।

---

11 दिगम्बर-श्वेताम्बरादीनाम्।

12 शरीरान्तर्वर्त्ति इति वा।

अथेदानीं कर्मणस्त्रैविध्यमुच्यते -

**नियतं सङ्गरहितमरागद्वेषतः कृतम्।**

**अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते।। १८.२३।।**

नियतमिति - नियतं नित्यं सङ्गरहितम् आसक्ति-वर्जितं अरागद्वेषतः कृतम् राग-प्रयुक्तेन द्वेष-प्रयुक्तेन च कृतं राग-द्वेषतः कृतं तद्विपरीतमराग-द्वेषतः कृतम् अफलप्रेप्सुना फलं प्रेप्सतीति फल-प्रेप्सुः फल-तृष्णः तद्विपरीतेनाफल-प्रेप्सुना कर्त्रा कृतं कर्म यत्तत् सात्त्विकमुच्यते।। २३।।

**यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।**

**क्रियते बहुलायासं तद्राजसमुदाहृतम्।। १८.२४।।**

यत्त्विति - यत्तु कामेप्सुना कर्म-फल-प्रेप्सुनेत्यर्थः, कर्म साहङ्कारेण वा साहङ्कारेणेति न तत्त्व-ज्ञानापेक्षया। किं तर्हि लौकिक-श्रोत्रिय-निरहङ्कारापेक्षया।

यो हि परमार्थ-निरहङ्कार आत्मवित् न तस्य कामेप्सुत्व-बहुलायास-कर्त्तृत्व-प्राप्तिरस्ति।

सात्त्विकस्यापि कर्मणोऽनात्मवित्साहङ्कारः कर्त्ता, किमुत राजस-तामसयोः।

लोके अनात्मविदपि श्रोत्रियो निरहङ्कार उच्यते निरहङ्कारोऽयं ब्राह्मणः इति।

तस्मात् तदपेक्षयैव साहङ्कारेण वा इत्युक्तम्। पुनः-शब्दः पाद-पूरणार्थः।

क्रियते बहुलायासं कर्त्रा महताऽऽयासेन निर्वर्त्यते। तत् कर्म राजसमुदाहृतम्।। २४।।

**अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।**

**मोहादारभ्यते कर्म यत्तत्तामसमुच्यते।। १८.२५।।**

अनुबन्धमिति। अनुबन्धं पश्चाद्भावि यद्वस्तु सोऽनुबन्ध उच्यते, तं चानुबन्धं, क्षयं यस्मिन् कर्मणि क्रियमाणे शक्ति-क्षयोऽर्थक्षयो वा स्यात्, तं क्षयं, हिंसां प्राणि-पीडां च अनपेक्ष्य च पौरुषं पुरुषकारं शक्नोमीदं कर्म समापयितुम् इत्येवमात्म-सामर्थ्यम् इत्येतान्यनुबन्धादीन्यनपेक्ष्य पौरुषान्तानि मोहाद् अविवेकतः आरभ्यते कर्म यत्तत् तामसं तमो-निर्वृत्तं उच्यते।। २५।।

इदानीं कर्त्तृ-भेद उच्यते -

**मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।**

**सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते।। १८.२६।।**

मुक्तेति। मुक्तसङ्गः मुक्तः परित्यक्तः सङ्गो येन स मुक्त-सङ्गः। अनहंवादी नाहंवदन-शीलः।

धृत्युत्साहसमन्वितः धृतिर्धारणम्, उत्साह उद्यमः, ताभ्यां समन्वितः संयुक्तो धृत्युत्साह-समन्वितः।

सिद्ध्यसिद्ध्योः क्रियमाणस्य कर्मणः फलसिद्धावसिद्धौ च सिद्ध्यसिद्ध्योः निर्विकारः केवलं शास्त्र-प्रमाणेन प्रयुक्तो न फल-रागादिना यः स निर्विकार उच्यते। एवं-भूतः कर्त्ता यः स सात्त्विक उच्यते।।

२६ ।।

**रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।**

**हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः।। १८.२७ ।।**

रागीति। रागी रागोऽस्यास्तीति रागी, कर्मफलप्रेप्सुः कर्म-फलार्थी लुब्धः पर-द्रव्येषु सञ्जात-तृष्णः, तीर्थादौ स्व-द्रव्यापरित्यागी वा, हिंसात्मकः पर-पीडा-कर-स्वभावः अशुचिः बाह्यान्तः-शौच-वर्जितः हर्षशोकान्वितः इष्ट-प्राप्तौ हर्षोऽनिष्ट-प्राप्तौ इष्ट-वियोगे च शोकस्ताभ्यां हर्ष-शोकाभ्यामन्वितः संयुक्तः, तस्यैव च कर्मणः संपत्ति-विपत्तिभ्यां[13] हर्ष-शोकौ स्यातां, ताभ्यां संयुक्तो यः कर्त्ता स राजसः परिकीर्त्तितः।। २७ ।।

[13] संपत्ति-विपत्त्योः इति वा।

**अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः।**

**विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते।। १८.२८।।**

अयुक्त इति। अयुक्तः असमाहितः प्राकृतः अत्यन्तासंस्कृत-बुद्धिः, बाल-समः स्तब्धः दण्डवन्न नमति कस्मैचित् शठः मायावी शक्ति-गूहन-कारी नैकृतिकः पर-वृत्ति-च्छेदन-परः अलसः अप्रवृत्ति-शीलः कर्त्तव्येष्वपि विषादी सर्वदाऽवसन्न-स्वभावो दीर्घसूत्री च कर्त्तव्यानां दीर्घ-प्रसारणः, सर्वदा मन्द-स्वभावः, यदद्य स्वो वा कर्त्तव्यं तन्मासेनापि न करोति, यश्चैवं-भूतः स कर्त्ता तामस उच्यते।। २८।।

**बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं श्रृणु।**

**प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय।। १८.२९ ।।**

बुद्धेर्भेदमिति। बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सत्त्वादि-गुणतः त्रिविधं श्रृणु इति सूत्रोपन्यासः।

प्रोच्यमानं कथ्यमानम् अशेषेण निरवशेषतो यथावत् पृथक्त्वेन विवेकतः धनञ्जय।

दिग्विजये मानुषं दैवं च प्रभूतं धनं जितवान् तेनासौ धनञ्जयोऽर्जुनः।। २९ ।।

**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।**

**बन्धं मोक्षं च या वेत्ति बुद्धिस्सा पार्थ सात्त्विकी।। १८.३०।।**

प्रवृत्तिं चेति। प्रवृत्तिं च प्रवृत्तिः प्रवर्त्तनं बन्ध-हेतुः, कर्म-मार्गः, शास्त्र-विहित-विषयः।

निवृत्तिं च निवृत्तिः मोक्ष-हेतुः, संन्यास-मार्गः। बन्ध-मोक्ष-समान-वाक्यत्वात् प्रवृत्ति-निवृत्ती कर्म-संन्यास-मार्गौ इत्यवगम्यते। कार्याकार्ये विहित-प्रतिषिद्धे लौकिके वैदिके वा शास्त्र-बुद्धेः कर्त्तव्याकर्त्तव्ये करणाकरणे इत्येतत्। कस्य देश-कालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणाम्। भयाभये बिभेत्यस्मादिति भयं, न भयमभयं, भयं चाभयं च भयाभये, दृष्टादृष्ट-विषययोर्भयाभययोः कारणे इत्यर्थः।

बन्धं सहेतुकं मोक्षं च सहेतुकं या वेत्ति विजानाति बुद्धिः सा पार्थ सात्त्विकी।

तत्र ज्ञानं बुद्धेर्वृत्तिः, बुद्धिस्तु वृत्तिमती। धृतिरपि वृत्ति-विशेष एव बुद्धेः।। ३०।।

**यया धर्ममधर्मं च कार्यं चाकार्यमेव च।**

**अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी।। १८.३१।।**

ययेति। यया धर्मं शास्त्र-चोदितम् अधर्मं च तत्प्रतिषिद्धं कार्यं चाकार्यमेव च पूर्वोक्ते एव कार्याकार्ये अयथावत् न यथावत् सर्वतो निर्णयेन न प्रजानाति बुद्धिः सा पार्थ राजसी।। ३१।।

**अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता।**

**सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी।। १८.३२।।**

अधर्ममिति। अधर्मं प्रतिषिद्धं धर्मं विहितम् इति या मन्यते जानाति तमसाऽऽवृता सती,

सर्वार्थान् सर्वानेव ज्ञेय-पदार्थान् विपरीतांश्च विपरीतानेव विजानाति बुद्धिः सा पार्थ तामसी।। ३२।।

**धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।**

**योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी।। १८.३३।।**

धृत्येति। धृत्या यया अव्यभिचारिण्येति व्यविहितेन सम्बन्धः।

धारयते, किम् मनःप्राणेन्द्रियक्रियाः मनश्च प्राणाश्च इन्द्रियाणि च मनः-प्राणेन्द्रियाणि तेषां क्रियाश्चेष्टाः,

ताः उच्छास्त्र-मार्ग-प्रवृत्तेः धारयते धारयति। धृत्या हि धार्यमाणा उच्छास्त्र-मार्ग-विषया न भवन्ति।

योगेन समाधिना, अव्यभिचारिण्या नित्य-समाध्यनुगतयेत्यर्थः।

एतदुक्तं भवति - अव्यभिचारिण्या धृत्या मनः-प्राणेन्द्रिय-क्रियाः धार्यमाणा[14] योगेन धारयतीति।

या एवं-लक्षणा धृतिः सा पार्थ सात्त्विकी।। ३३ ।।

---

[14] धारयमाणा इति वा।

**यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।**

**प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी।। १८.३४।।**

ययेति। यया तु धर्मकामार्थान् धर्मश्च कामश्चार्थश्च धर्म-कामार्थाः तान् धर्म-कामार्थान् धृत्या यया धारयते मनसि नित्य-कर्त्तव्य-रूपानवधारयते हे अर्जुन, प्रसङ्गेन यस्य यस्य धर्मादेर्धारण-प्रसङ्गः तेन तेन प्रसङ्गेन फलाकाङ्क्षी च भवति यः पुरुषः तस्य धृतिः या सा पार्थ राजसी।। ३४।।

**यया स्वप्नं भयं शोकं विषादं मदमेव च।**

**न विमुञ्चति दुर्मेधाः धृतिः सा पार्थ तामसी**[15] **।। १८.३५।।**

ययेति। यया स्वप्नं निद्रां भयं त्रासं शोकं विषादम् अवसादं विषण्णतां मदं विषय-सेवामात्मनो बहु मन्यमानो मत्त इव मदम् एव च मनसि नित्यमेव कर्त्तव्य-रूपतया कुर्वन् न विमुञ्चति धारयत्येव दुर्मेधाः कुत्सित-मेधाः पुरुषो यः तस्य धृतिः या सा तामसी मता।। ३५।।

---

[15] धृतिः सा तामसी मता इति पाठभेदः।

गुण-भेदेन क्रियाणां कारकाणां च त्रि-विधो भेद उक्तः। अथेदानीं फलस्य च सुखस्य त्रि-विधो भेद उच्यते -

**सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।**

**अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति।। १८.३६।।**

सुखमिति। सुखं त्विदानीं त्रिविधं शृणु समाधानं कुर्वित्येतत् मे मम भरतर्षभ।

अभ्यासात् परिचयादावृत्तेः रमते रतिं प्रतिपद्यते यत्र यस्मिन् सुखानुभवे दुःखान्तं च दुःखावसानं दुःखोपशमं च निगच्छति निश्चयेन प्राप्नोति।। ३६।।

**यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।**

**तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्।। १८.३७।।**

यदिति। यत्तत् सुखम् अग्रे पूर्वं प्रथम-सन्निपाते ज्ञान-वैराग्य-ध्यान-समाध्यारम्भे अत्यन्तायासपूर्वकत्वाद् विषमिव दुःखात्मकं भवति, परिणामे ज्ञान-वैराग्यादि-परि-पाकजं सुखम् अमृतोपमं, तत्सुखं सात्त्विकं प्रोक्तं विद्वद्भिः।

आत्मनो बुद्धिरात्म-बुद्धिः, आत्म-बुद्धेः प्रसादो नैर्मल्यं सलिलस्येव स्वच्छता, ततो जातम् आत्मबुद्धिप्रसादजम्।

आत्म-विषया वाऽऽत्मावलम्बना वा बुद्धिरात्मबुद्धिः, तत्प्रसाद-प्रकर्षाद्वा जातमित्येतत्। तस्मात् सात्त्विकं तत्।। ३७।।

**विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम्।**

**परिणामे विषमिव तत्सुखं राजसं स्मृतम्।। १८.३८।।**

विषयेति। विषयेन्द्रियसंयोगाद् जायते यत् सुखं तत् सुखं अग्रे प्रथम-क्षणे अमृतोपमम् अमृत-समम्।

परिणामे विषमिव बल-वीर्य-रूप-प्रज्ञा-मेधा-धनोत्साह-हानि-हेतुत्वाद् अधर्म-तज्जनित-नरकादि-हेतुत्वाच्च

परिणामे तदुपभोग-परिणामान्ते विषमिव, तत्सुखं राजसं स्मृतम्।। ३८।।

**यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।**

**निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्।। १८.३९।।**

यदग्रे चेति। यदग्रे चानुबन्धे च अवसानोत्तर-काले सुखं मोहनं मोह-करम् आत्मनः।

निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्च तेभ्यः समुत्तिष्ठतीति निद्रालस्य-प्रमादोत्थं

तत्तामसमुदाहृतम्।। ३९।।

अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते -

**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।**

**सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः।। १८.४०।।**

नेति। न तदस्ति तन्नास्ति पृथिव्यां वा मनुष्यादिषु[16] सत्त्वं प्राणि-जातमन्यद्वाऽप्राणि-जातं, दिवि देवेषु वा पुनः सत्त्वं, प्रकृतिजैः प्रकृतितो जातैः एभिः त्रिभिर्गुणैः सत्त्वादिभिर्मुक्तं परित्यक्तं यत् स्यात् भवद् न तदस्तीति पूर्वेण सम्बन्धः।। ४०।।

[16] मनुष्यादि इति वा।

सर्वः संसारः क्रिया-कारक-फल-लक्षणः सत्त्व-रजस्-तमो-गुणात्मकोऽविद्या-परिकल्पितः समुलोऽनर्थ उक्तः, वृक्ष-रूप-कल्पनया च ऊर्ध्वमूलम् (गी १५.१) इत्यादिना, तं च असङ्ग-शस्त्रेण दृढेन छित्त्वा ततः पदं तत्परिमार्गितव्यम् (१५.३) इति चोक्तम्।

तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसार-कारण-निवृत्त्यनुपपत्तौ प्राप्तायां, यथा तन्निवृत्तिः स्यात् तथा वक्तव्यम्, सर्वश्च गीता-शास्त्रार्थ उपसंहर्त्तव्यः, एतावानेव च सर्व-वेद-स्मृत्यर्थः पुरुषार्थमिच्छद्भिरनुष्ठेय इत्येवमर्थं ब्राह्मण-क्षत्रिय-विशाम् इत्यादिरारभ्यते -

**ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।**

**कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।। १८.४१।।**

ब्राह्मणेति। ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मण-क्षत्रिय-विशः तेषां ब्राह्मणक्षत्रियविशां शूद्राणां च शूद्राणामसमासकरणमेकजातित्वे सति वेदानधिकारात् हे परन्तप कर्माणि प्रविभक्तानि इतरेतर-विभागेन

व्यवस्थापितानि।

केन स्वभावप्रभवैर्गुणैः स्वभावः ईश्वरस्य प्रकृतिः त्रिगुणात्मिका माया, सा प्रभवो येषां गुणानां ते स्वभाव-प्रभवाः, तैः शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनाम्।

अथवा ब्राह्मण-स्वभावस्य सत्त्वगुणः प्रभवः कारणं, तथा क्षत्रिय-स्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः, वैश्य-स्वभावस्य तम-उपसर्जनं रजः प्रभवः, शूद्र-स्वभावस्य रज-उपसर्जनं तमः प्रभवः, प्रशान्त्यैश्वर्येहा-मूढता-स्वभाव-दर्शनाच्चतुर्णाम्।

अथवा जन्मान्तर-कृत-संस्कारः प्राणिनां वर्त्तमान-जन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः। स प्रभवो येषां गुणानां ते स्वभाव-प्रभवा गुणाः, गुण-प्रादुर्भावस्य निष्कारणत्वानुपपत्तेः। स्वभावः कारणमिति च कारण-विशेषोपादानम्। एवं स्वभाव-प्रभवैः प्रकृति-प्रभवैः सत्त्व-रजस्-तमोभिर्गुणैः स्व-कार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि।।

**आक्षेपः**

ननु शास्त्र-प्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि, कथमुच्यते सत्त्वादि-गुण-प्रविभक्तानीति।

**समाधानम्**

नैष दोषः। शास्त्रेणापि ब्राह्मणादीनां सत्त्वादि-गुण-विशेषापेक्षयैव शमादीनि कर्माण प्रविभक्तानि, न गुणानपेक्षयैव, इति शास्त्र-प्रविभक्तान्यपि कर्माणि गुण-प्रविभक्तानीत्युच्यन्ते।। ४१ ।।

कानि पुनस्तानि कर्माणीत्युच्यन्ते -

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**

**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।। १८.४२।।**

शम इति। शमो दमः च यथा-व्याख्यातार्थौ, तपः यथोक्तं शारीरादि, शौचं व्याख्यातं, क्षान्तिः क्षमा आर्जवम् ऋजुता एव च ज्ञानं विज्ञानम् आस्तिक्यम् आस्तिक-भावः श्रद्दधानता आगमार्थेषु ब्रह्मकर्म ब्राह्मण-जातेः कर्म स्वभावजम्।

यदुक्तं स्वभाव-प्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति । ४२।।

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**

**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।। १८.४३।।**

शैर्यमिति। शौर्यं शूरस्य भावः। तेजः प्रागल्भ्यम् धृतिः धारणं, सर्वावस्थास्वनवसादो भवति यया धृत्योत्तम्भितस्य। दाक्ष्यं दक्षस्य भावः, सहसा प्रत्युत्पन्नेषु कार्येष्वव्यामोहेन प्रवृत्तिः।

युद्धे चाप्यपलायनम् अपराङ्-मुखी-भावः शत्रुभ्यः।

दानं देयेषु मुक्त-हस्तता ईश्वरभावश्च ईश्वरस्य भावः, प्रभु-शक्ति-प्रकटी-करणमीशितव्यान्प्रति।

क्षात्रं कर्म क्षत्रिय-जातेर्विहितं कर्म क्षात्रं कर्म स्वभावजम्।। ४३।।

**कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।**

**परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।। १८.४४।।**

कृषीति। कृषिगौरक्ष्यवाणिज्यं कृषिश्च गौरक्ष्यं च वाणिज्यं च कृषि-गौरक्ष्य-वाणिज्यं, कृषिर्भूमेर्विलेखनं,

गौरक्ष्यं गा रक्षतीति गोरक्षः, तद्भावो गौरक्ष्यं पाशु-पाल्यमित्यर्थः।

वाणिज्यं वणिक्कर्म क्रय-विक्रयादि-लक्षणम्। वैश्यकर्म वैश्य-जातेः कर्म वैश्य-कर्म स्वभावजम्।

परिचर्यात्मकं शुश्रूषा-स्वभावं कर्म शूद्रस्यापि स्वभावजम्।। ४४।।

एतेषां जाति-विहितानां कर्मणां सम्यगनुष्ठितानां स्वर्ग-प्राप्तिः फलं स्वभावतः,

वर्णा आश्रमाश्च स्व-कर्म-निष्ठाः प्रेत्य कर्म-फलमनुभूय ततः शेषेण विशिष्ट-देश-जाति-कुल-धर्मायुः-

श्रुत-वृत्त-वित्त-सुख-मेधसो जन्म प्रतिपद्यन्ते (आप. २.२.२.३) इत्यादि-स्मृतिभ्यः,

पुराणे च वर्णिनामाश्रमिणां च लोक-फल-भेद-विशेष-स्मरणात्। कारणान्तरात्त्विदं वक्ष्यमाणं फलम् -

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।**

**स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु।। १८.४५।।**

स्वे स्वे इति। स्वे स्वे यथोक्त-लक्षण-भेदे कर्मण्यभिरतः तत्परः संसिद्धिं स्व-कर्मानुष्ठानादशुद्धि-क्षये सति

कायेन्द्रियाणां ज्ञान-निष्ठा-योग्यता-लक्षणां संसिद्धिं लभते प्राप्नोति नरः अधिकृतः पुरुषः।

किं स्वकर्मानुष्ठानत एव साक्षात् संसिद्धिः न।

कथं तर्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विन्दति तच्छृणु।। ४५।।

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।**

**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।। १८.४६।।**

यत इति। यतः यस्मात् प्रवृत्तिः उत्पत्तिश्चेष्टा वा यस्मादन्तर्यामिण ईश्वराद् भूतानां प्राणिनां स्याद् येन ईश्वरेण सर्वमिदं जगत् ततं व्याप्तं स्वकर्मणा पूर्वोक्तेन प्रति-वर्णं तम् ईश्वरम् अभ्यर्च्य पूजयित्वा आराध्य केवलं ज्ञान-निष्ठा-योग्यता-लक्षणां सिद्धिं विन्दति मानवः मनुष्यः।। ४६।।

यत एवमतः -

**श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**

**स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्।। १८.४७।।**

श्रेयानिति। श्रेयान् प्रशस्यतरः स्वो धर्मो स्वधर्मो विगुणः। अपीत्यपि-शब्दो द्रष्टव्यः।

परधर्मात्स्वनुष्ठितात्। स्वभावनियतं स्वभावेन नियतं यदुक्तं स्वभावजमिति तदेवोक्तं स्वभाव-नियतमिति।

यथा विष-जातस्येव कृमेर्विषं न दोषकरं तथा स्वभाव-नियतं कर्म कुर्वन्नाप्नोति किल्बिषं पापम् ।।

४७।।

स्वभाव-नियतं कर्म कुर्वाणो विषजः इव कृमिः किल्बिषं नाप्नोतीत्युक्तम्। पर-धर्मश्च भयावह इति।

अनात्मज्ञश्च न हि कश्चित्क्षणमप्यकर्मकृत्तिष्ठति (गी ३.५) इति। अतः-

**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।**

**सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।। १८.४८।।**

सहजमिति। सहजं सह जन्मनैवोत्पन्नम्। किं तत् कर्म, कौन्तेय सदोषमपि त्रिगुणात्मकत्वाद् न त्यजेत्।

सर्वारम्भाः आरभ्यन्ते इत्यारम्भाः, सर्व-कर्माणीत्येतत्, प्रकरणात्।

ये केचिदारम्भाः स्वधर्माः परधर्माश्च ते सर्वे हि यस्मात् - त्रिगुणात्मकत्वमत्र हेतुः - त्रिगुणात्मकत्वाद्

दोषेण धूमेन सहजेन अग्निः इव आवृताः।

सहजस्य कर्मणः स्व-धर्माख्यस्य परित्यागेन पर-धर्मानुष्ठानेऽपि दोषान्नैव मुच्यते। भयावहश्च पर-धर्मः।

न च शक्यते अशेषतस्त्यक्तुमज्ञेन कर्म यतः तस्मान्न त्यजेदित्यर्थः।।

**आक्षेपः**

किमशेषतस्त्यक्तुमशक्यं कर्मेति न त्यजेत् किंवा सहजस्य कर्मणः त्यागे दोषो भवतीति

**प्रत्याक्षेपः**

किञ्चातः

**आक्षेपः**

यदि तावद् अशेषतस्त्यक्तुमशक्यमिति न त्याज्यं सहजं कर्म, एवं तर्हि अशेषतस्त्यागे गुण एव स्यादिति

सिद्धं भवति।

**समाधानम्**

सत्यमेवम्। अशेषतस्त्याग एव नोपपद्यते इति चेत्।

किं नित्यप्रचलितात्मकः पुरुषो यथा सांख्यानां गुणाः किं वा क्रियैव कारकं यथा बौद्धानां पञ्च-स्कन्धाः

क्षण-प्रध्वंसिनः उभयथापि कर्मणोऽशेषतस्त्यागो न सम्भवति।

अथ तृतीयोऽपि पक्षः - यदा करोति तदा सक्रियं वस्तु। यदा न करोति तदा निष्क्रियं वस्तु तदेव।

तत्रैवं सति शक्यं कर्म अशेषतस्त्यक्तुम्। अयं चास्मिंस्तृतीये पक्षे विशेषः।

न नित्य-प्रचलितं वस्तु, नापि क्रियैव कारकम्। किं तर्हि व्यवस्थिते द्रव्येऽविद्यमाना क्रियोत्पद्यते।

विद्यमाना च विनश्यति। शुद्धं तद्द्रव्यं शक्तिमदवतिष्ठते इत्येवमाहुः काणादास्तदेव च कारकमिति।

अस्मिन् पक्षे को दोष इति। अयमेव तु दोषः - यतस्त्वभागवतं मतमिदम्।

कथं ज्ञायते यत आह भगवान् नासतो विद्यते भावः (गी २.१६) इत्यादि।

काणादानां हि असतो भावः, सतश्चाभावः, इतीदं मतम् अभागवतम्।।

**आक्षेपः**

अभागवतत्वेऽपि न्यायवच्चेत् को दोष इति चेत्।

**समाधानम्**

उच्यते, दोषवत्त्विदं सर्व-प्रमाण-विरोधात्। कथम् यदि तावद् द्व्यणुकादि द्रव्यं प्रागुत्पत्तेरत्यन्तमेवासत्,

उत्पन्नं च स्थितं किञ्चित्कालं, पुनरत्यन्तमेव असत्वमापद्यते, तथा च सति असदेव सज्जायते, सदेव

असत्वमापद्यते, अभावो भावो भवति, भावश्चाभाव इति।

तत्राभावो जायमानः प्रागुत्पत्तेः शश-विषाण-कल्पः समवाय्यसमवायि-निमित्ताख्यं कारणमपेक्ष्य जायते इति। न चैवमभाव उत्पद्यते कारणं चापेक्षते इति शक्यं वक्तुम्। असतां शश-विषाणादीनामदर्शनात्।

भावात्मकाश्चेत् घटादय उत्पद्यमानाः, किञ्चिदभिव्यक्ति-मात्र-कारणमपेक्ष्योत्पद्यन्ते इति शक्यं प्रतिपत्तुम्।

किञ्चासतश्च सद्भावे सतश्चासद्भावे, न क्वचित् प्रमाण-प्रमेय-व्यवहारेषु विश्वासः कस्यचित् स्यात् - सत्सदेवासदसदेवेति निश्चयानुपपत्तेः।।

किञ्च उत्पद्यते इति द्व्यणुकादेर्द्रव्यस्य स्व-कारण-सत्ता-सम्बन्धमाहुः।

प्रागुत्पत्तेश्चासत्, पश्चात्स्वकारणव्यापारमपेक्ष्य स्व-कारणैः परमाणुभिः सत्तया च समवाय-लक्षणेन सम्बन्धेन सम्बध्यते। सम्बद्धं सत् कारण-समवेतं सद् भवति।

तत्र वक्तव्यं कथमसतः सत् कारणं भवेत्, सम्बन्धो वा केनचित् स्यात्।

न हि वन्ध्या-पुत्रस्य सता कारणं सम्बन्धो वा केनचित् प्रमाणतः कल्पयितुं शक्यते।

**पूर्वपक्षः**

ननु नैवं वैशेषिकैरभावस्य सम्बन्धः कल्प्यते।

द्व्यणुकादीनां हि द्रव्याणां स्व-कारणेन समवाय-लक्षणः सम्बन्धः सतामेवोच्यते इति।

**खण्डनम्**

न, सम्बन्धात् प्राक् सत्त्वानभ्युपगमात्।

न हि वैशेषिकैः कुलाल-दण्ड-चक्रादि-व्यापारात्प्राक् घटादीनामस्तित्वमिष्यते।

न च मृद एव घटाद्याकार-प्राप्तिम् इच्छन्ति। ततश्च असत एव सम्बन्धः पारिशेष्यादिष्टो भवति।

**पूर्वपक्षः**

ननु असतोऽपि समवाय-लक्षणः सम्बन्धो न विरुद्धः।

**खण्डनम्**

न, वन्ध्या-पुत्रादीनामदर्शनात्। घटादेरेव प्रागभावस्य स्वकारणेन सम्बन्धो भवति, न वन्ध्या-पुत्रादेः,

अभावस्य तुल्यत्वेऽपीति विशेषोऽभावस्य वक्तव्यः। एकस्याभावो, द्वयोरभावः, सर्वस्याभावः,

प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभाव इति लक्षणतो न केनचिद्विशेषो दर्शयितुं शक्यः।

असति च विशेषे घटस्य प्रागभावः एव कुलालादिभिर्घटभावमापद्यते, सम्बध्यते च भावेन कपालाख्येन स्वकारणेन, सम्बद्धश्च सर्व-व्यवहार-योग्यश्च भवति, न तु घटस्यैव प्रध्वंसाभावः अभावत्वे सत्यपि इति प्रध्वंसाद्यभावानां न क्वचिद् व्यवहार-योग्यत्वं, प्रागभावस्यैव द्व्यणुकादि-द्रव्याख्यस्य उत्पत्त्यादि-व्यवहारार्हत्वं इत्येतत् समञ्जसमभावत्वाविशेषाद् अत्यन्तप्रध्वंसाभावयोः इव।।

**पूर्वपक्षः**

ननु नैवास्माभिः प्रागभावस्य भावापत्तिरुच्यते। भावस्यैव हि तर्हि भावापत्तिः यथा घटस्य पटस्य घटापत्तिर्वा पटापत्तिः।।

**खण्डनम्**

एतदप्यभावस्य भावापत्तिवदेव प्रमाण-विरुद्धम्। सांख्यस्यापि यः परिणाम-पक्षः सोऽपि अपूर्व-धर्मोत्पत्ति-विनाशाङ्गी-करणाद्वैशेषिकपक्षान्न विशिष्यते। अभिव्यक्ति-तिरोभावाङ्गी-करणेऽपि अभिव्यक्ति-तिरोभावयोर्विद्यमानत्वाविद्यमानत्व-निरूपणे पूर्ववद् एव प्रमाण-विरोधः।

एतेन कारणस्यैव संस्थानमुत्पत्त्यादीत्येतदपि प्रत्युक्तम्।।

**सिद्धान्तः**

पारिशेष्यात् सदेकमेव वस्त्वविद्ययोत्पत्ति-विनाशादि-धर्मैर्नटवदनेकधा विकल्प्यते इति।

इदं भागवतं मतमुक्तं नासतो विद्यते भावः (गी २.१६) इत्यस्मिन् श्लोके, सत्प्रत्ययस्याव्यभिचारात्, व्यभिचाराच्चेतरेषामिति।।

**आक्षेपः**

कथं तर्हि आत्मनोऽविक्रियत्वेऽशेषतः कर्मणस्त्यागो नोपपद्यत इति।

**समाधानम्**

यदि वस्तुभूता गुणा यदि वा अविद्या-कल्पिताः, तद्धर्मः कर्म, तदात्मन्यविद्याध्यारोपितमेव इत्यविद्वान् न हि कश्चित्क्षणमपि अशेषतस्त्यक्तुं शक्नोति (गी ३.५) इत्युक्तम्।

विद्वांस्तु पुनर्विद्यया अविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुमविद्याऽध्यारोपितस्य शेषानुपपत्तेः।

न हि तैमिरिक-दृष्ट्याऽध्यारोपितस्य द्वि-चन्द्रादेः तिमिरापगमे शेषोऽवतिष्ठते।

एवं च सतीदं वचनमुपपन्नं सर्व-कर्माणि मनसा (गी ५.१३) इत्यादि।

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः (गी १८.४५) स्व-कर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः

(गी १८.४६) इति च।। ४८ ।।

या च कर्मजा सिद्धिरुक्ता ज्ञान-निष्ठा-योग्यता-लक्षणा तस्याः फल-भूता नैष्कर्म्य-सिद्धिर्ज्ञान-निष्ठा-लक्षणा

च वक्तव्येति श्लोक आरभ्यते -

**असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।**

**नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति।। १८.४९।।**

असक्तबुद्धिरिति। असक्तबुद्धिः असक्ता सङ्ग-रहिता बुद्धिरन्तःकरणं यस्य सोऽसक्त-बुद्धिः सर्वत्र पुत्र-

दारादिषु आसक्ति-निमित्तेषु। जितात्मा जितो वशी-कृत आत्मा अन्तः-करणं यस्य स जितात्मा।

विगतस्पृहः विगता स्पृहा तृष्णा देह-जीवित-भोगेषु यस्मात्स विगत-स्पृहः।

य एवं-भूत आत्मज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्मान्निष्क्रिय-ब्रह्मात्म-सम्बोधात् स निष्कर्मा,

तस्य भावो नैष्कर्म्यं, नैष्कर्म्यं च तत्सिद्धिश्च नैष्कर्म्य-सिद्धिः नैष्कर्म्यस्य वा निष्क्रियात्म-रूपावस्थान-लक्षणस्य सिद्धिर्निष्पत्तिः तां नैष्कर्म्य-सिद्धिं परमां प्रकृष्टां कर्मज-सिद्धि-विलक्षणां सद्योमुक्त्यवस्थान-रूपां संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्व-कर्म-संन्यासेन अधिगच्छति प्राप्नोति।

तथा चोक्तं सर्व-कर्माणि मनसा संन्यस्य नैव कुर्वन्न न कारयन्नास्ते (गी ५.१३) इति।। ४९ ।।

पूर्वोक्तेन स्व-कर्मानुष्ठानेनेश्वराभ्यर्चन-रूपेण जनितां प्रागुक्त-लक्षणां सिद्धिं प्राप्तस्य उत्पन्नात्म-विवेक-ज्ञानस्य केवलात्म-ज्ञान-निष्ठा-रूपा नेष्कर्म्य-लक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह -

**सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।**

**समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ।। १८.५०।।**

सिद्धिमिति। सिद्धिं प्राप्तः स्व-कर्मणेश्वरं समभ्यर्च्य तत्प्रसादजां कायेन्द्रियाणां ज्ञान-निष्ठा-योग्यता-लक्षणां सिद्धिं प्राप्तः। सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः। किं तदुत्तरं यदर्थोऽनुवाद इत्युच्यते।

यथा येन प्रकारेण ज्ञान-निष्ठा-रूपेण ब्रह्म परमात्मानम् आप्नोति तथा तं प्रकारं ज्ञान-निष्ठा-प्राप्ति-क्रमं मे मम वचनाद् निबोध त्वं निश्चयेनावधारयेत्येतत्।

किं विस्तरेण नेत्याह - समासेनैव संक्षेपेणैव हे कौन्तेय यथा ब्रह्म प्राप्नोति तथा निबोधेति।

अनेन या प्रतिज्ञाता ब्रह्म-प्राप्तिः तामिदन्तया दर्शयितुमाह - निष्ठा ज्ञानस्य या परा इति।

निष्ठा पर्यवसानं परिसमाप्तिरित्येतत्। कस्य ब्रह्म-ज्ञानस्य या परा परिसमाप्तिः।

कीदृशी सा (निष्ठा) यादृशमात्म-ज्ञानम्। कीदृशमात्म-ज्ञानम् यादृश आत्मा।

कीदृशोऽसौ यादृशो भगवतोक्त उपनिषद्वाक्यैश्च न्यायतश्च।।

**आक्षेपः**

ननु विषयाकारं ज्ञानम्। न विषयो नाप्याकारवानात्मेष्यते क्वचित्।

**समाधानम्**

ननु आदित्य-वर्णं भा-रूपः स्वयं-ज्योतिः इत्याकारवत्त्वमात्मनः श्रूयते।

**आक्षेपः**

न। तमोरूपत्व-प्रतिषेधार्थत्वात्तेषां वचनानाम्।

द्रव्य-गुणाद्याकार-प्रतिषेधे आत्मनस्तमो-रूपत्वे प्राप्ते तत्प्रतिषेधार्थानि आदित्यवर्णम् (श्वे ३.८) इत्यादि-

वाक्यानि। अरूपम् (कठ ३.१५) इति च विशेषतो रूप-प्रतिषेधात्। अविषयत्वाच्च न संदृशे तिष्ठति

रूपमस्य न चक्षुषा पश्यति कश्चनैनम् (श्वे ४.२०) अशब्दमस्पर्शम् (कठ ३.१५) इत्याद्यैः।

तस्मादात्माकारं ज्ञानम् इत्यनुपपन्नम्। कथं तर्ह्यात्मनो ज्ञानम्। सर्वं हि यद्विषयं यज्ज्ञानं तत्तदाकारं

भवति। निराकारश्चात्मेत्युक्तम्। ज्ञानात्मनोश्चोभयोर्निराकारत्वे कथं तद्भावना-निष्ठेति।।

**समाधानम्**

न, अत्यन्त-निर्मलत्वातिस्वच्छत्वातिसूक्ष्मत्वोपपत्तेरात्मनः।

बुद्धेश्च आत्म-सम-नैर्मल्याद्युपपत्तेः आत्म-चैतन्याकाराभासत्वोपपत्तेः।

बुद्ध्याभासं मनः, तदाभासानि इन्द्रियाणि, इन्द्रियाभासश्च देहः।

अतो लौकिकैर्देह-मात्रे एवात्म-दृष्टिः क्रियते।।

देह-चैतन्य-वादिनश्च लोकायतिकाः चैतन्य-विशिष्टः कायः पुरुषः इत्याहुः।

तथाऽन्ये इन्द्रिय-चैतन्य-वादिनः, अन्ये मनश्चैतन्य-वादिनः, अन्ये बुद्धि-चैतन्य-वादिनः।

ततोऽपि आन्तरमव्यक्तमव्याकृताख्यमविद्यावस्थं आत्मत्वेन प्रतिपन्नाः केचित्।

सर्वत्र हि बुद्ध्यादि-देहान्ते आत्म-चैतन्याभासता आत्म-भ्रान्ति-कारणमित्यतश्चात्म-विषयं ज्ञानं न विधातव्यम्।

किं तर्हि नाम-रूपाद्यनात्माध्यारोपण-निवृत्तिरेव कार्या, नात्म-चैतन्य-विज्ञानं कार्यम्, अविद्याऽध्यारोपित-सर्व-पदार्थाकारैरेव विशिष्टतया गृह्यमाणत्वादिति।

अत एव हि विज्ञान-वादिनो बौद्धा विज्ञान-व्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः, प्रमाणान्तर-निरपेक्षतां च स्व-संविदित्वाभ्युपगमेन।

तस्मादविद्याऽध्यारोपित-निराकरण-मात्रं ब्रह्मणि कर्त्तव्यं, न तु ब्रह्म-विज्ञाने यत्नोऽत्यन्त-प्रसिद्धत्वात्।

अविद्या-कल्पित-नाम-रूप-विशेषाकारापहृत-बुद्धीनामत्यन्त-प्रसिद्धं सुविज्ञेयमासन्नतरमात्मभूतमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरमन्यदिव च प्रतिभात्यविवेकिनाम्। बाह्याकार-निवृत्त-बुद्धीनां तु लब्ध-गुर्वात्म-प्रसादानां नातःपरं सुखं सुप्रसिद्धं सुविज्ञेयं स्वासन्नतरमस्ति। तथो चोक्तं प्रत्यक्षावगमं धर्म्यम् (गी ९.२) इत्यादि।।

केचित्तु पण्डितं-मन्याः निराकारत्वादात्म-वस्तु नोपैति बुद्धिः, अतो दुस्साध्या सम्यग्ज्ञान-निष्ठा इत्याहुः।

सत्यमेवं गुरु-सम्प्रदाय-रहितानामश्रुत-वेदान्तानामत्यन्त-बहिर्विषयासक्त-बुद्धीनां सम्यक्प्रमाणेष्वकृत-

श्रमाणाम्। तद्विपरीतानां तु लौकिक-ग्राह्य-ग्राहक-द्वैत-वस्तुनि सद्बुद्धिर्नितरां दुस्सम्पाद्या आत्म-चैतन्य-

व्यतिरेकेण वस्त्वन्तरस्य अनुपलब्धेः। यथा च एतदेवमेव नान्यथा इत्यवोचाम।

उक्तं च भगवता यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः (गी २.६९) इति।

तस्माद् बाह्याकार-भेद-बुद्धि-निवृत्तिरेवात्म-स्वरूपालम्बने कारणम्।

न ह्यात्मा नाम कस्यचित् कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा।

अप्रसिद्धे हि तस्मिन्नात्मनि स्वार्थाः[17] सर्वाः प्रवृत्तयो व्यर्थाः प्रसज्येरन्।

न च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुम्।

[17] अस्वार्थाः सर्वाः प्रवृत्तय प्रसज्येरन् इति पाठान्तरम्।

न च सुखार्थं सुखं, दुःखार्थं वा दुःखम्। आत्मावगत्यवसानार्थत्वाच्च सर्व-व्यवहारस्य।

तस्माद्यथा स्व-देहस्य परिच्छेदाय न प्रमाणान्तरापेक्षा, ततोऽप्यात्मनोऽन्तरतमत्त्वात् तदवगतिं प्रति न

प्रमाणान्तरापेक्षा इत्यात्म-ज्ञान-निष्ठा विवेकिनां सुप्रसिद्धेति सिद्धम्।।

येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञान-वशैव ज्ञेयावगतिरिति ज्ञानमत्यन्तं प्रसिद्धं

सुखादिवदेवेत्यभ्युपगन्तव्यम्।

जिज्ञासानुपपत्तेश्च। अप्रसिद्धं चेज्ज्ञानं ज्ञेयवज्जिज्ञास्येत।

यथा ज्ञेयं घटादि-लक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छति तथा ज्ञानमपि ज्ञानान्तरेण ज्ञाता व्याप्तुमिच्छेत्।

न चैतदस्ति। अतोऽत्यन्त-प्रसिद्धं ज्ञानं, ज्ञाताऽऽप्यत एव प्रसिद्ध इति। तस्माज्ज्ञाने यत्नो न कर्त्तव्यः,

किं त्वनात्मन्यात्म-बुद्धि-निवृत्तौ एव। तस्माज्ज्ञान-निष्ठा सुसम्पाद्या।। ५०।।

सेऽयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येति -

**बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।**

**शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च।। १८.५१ ।।**

बुद्ध्येति। बुद्ध्या अध्यवसात्मिकया विशुद्धया माया-रहितया युक्तः सम्पन्नो धृत्या धैर्येण आत्मानं कार्य-करण-सङ्घातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादीन् शब्द आदिर्येषां ते शब्दादयस्तान् विषयांस्त्यक्त्वा।

सामर्थ्याच्छरीर-स्थिति-मात्र-हेतु-भूतान् केवलान् मुक्त्वा ततोऽधिकान् सुखार्थान् त्यक्त्वेत्यर्थः।

शरीर-स्थित्यर्थत्वेन प्राप्तेषु रागद्वेषौ व्युदस्य परित्यज्य च।। ५१ ।।

ततः -

**विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।**

**ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।। १८.५२ ।।**

विविक्तेति। विविक्तसेवी अरण्य-नदी-पुलिन-गिरि-गुहादीन् विविक्तान् देशान् सेवितुं शीलमस्येति विविक्त-सेवी। लघ्वाशी लघ्वशन-शीलः। विविक्त-सेवा-लघ्वशनयोर्निद्रादि-दोष-निवर्त्तकत्वेन चित्त-प्रसाद-हेतुत्वाद् ग्रहणम्। यतवाक्कायमानसः वाक् च कायश्च मानसं च यतानि संयतानि यस्य ज्ञान-निष्ठस्य स ज्ञान-निष्ठो यतिर्यत-वाक्काय-मानसः स्यात्। एवमुपरत-सर्व-करणः सन् ध्यानयोगपरः ध्यानमात्म-स्वरूप-चिन्तनं, योग आत्म-विषये एवैकाग्री-करणं, तौ ध्यान-योगौ परत्वेन कर्त्तव्यौ यस्य स ध्यान-योग-परः नित्यं नित्य-ग्रहणं मन्त्र-जपाद्यन्य-कर्त्तव्याभाव-प्रदर्शनार्थम्।

वैराग्यं विराग-भावो दृष्टादृष्टेषु विषयेषु वैतृष्ण्यं समुपाश्रितः सम्यगुपाश्रितो नित्यमेवेत्यर्थः।। ५२ ।।

किञ्च -

**अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।**

**विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।। १८.५३ ।।**

अहङ्कारमिति। अहङ्कारम् अहङ्करणमहङ्कारो देहेन्द्रियादिषु तं बलं सामर्थ्यं काम-रागादि-युक्तं, नेतरच्छरीरादि-सामर्थ्यं स्वाभाविकत्वेन तत्त्यागस्याशक्यत्वात्, दर्पं दर्पो नाम हर्षानन्तर-भावी धर्मातिक्रम-हेतुः हृष्टो दृप्यति, दृप्तो धर्ममतिक्रामति (आप.ध. १.१३.४) इति स्मरणात्तं च, कामम् इच्छां, क्रोधं द्वेषं, परिग्रहम् इन्द्रिय-मनो-गत-दोष-परित्यागेऽपि शरीर-धारण-प्रसङ्गेन धर्मानुष्ठान-निमित्तेन वा बाह्यः परिग्रहः प्राप्तः, तं च, विमुच्य परित्यज्य परम-हंस-परिव्राजको भूत्वा देह-जीवन-मात्रेऽपि निर्गत-मम-भावः निर्ममः अत एव शान्तः उपरतः। यः संहत-हर्षायासो यतिर्ज्ञान-निष्ठो ब्रह्मभूयाय ब्रह्म-भवनाय कल्पते समर्थो भवति।। ५३ ।।

अनेन क्रमेण -

**ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।**

**समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्।। १८.५४ ।।**

ब्रह्मभूत इति। ब्रह्मभूतः ब्रह्म-प्राप्तः प्रसन्नात्मा लब्धाध्यात्म-प्रसादो न शोचति किञ्चिदर्थवैकल्यमात्मनो वैगुण्यं वा उद्दिश्य न शोचति न सन्तप्यते। न काङ्क्षति। ब्रह्म-भूतस्यायं स्वभावोऽनूद्यते न शोचति न काङ्क्षतीति। न ह्यप्राप्त-विषयाकाङ्क्षा ब्रह्म-विद उपपद्यते। न हृष्यतीति वा पाठः।

समः सर्वेषु भूतेषु आत्मौपम्येन सर्वेषु भूतेषु सुखं दुःखं वा सममेव पश्यतीत्यर्थः।

नाऽऽत्म-समदर्शनमिह तस्य वक्ष्यमाणत्वात् भक्त्या मामभिजानाति (गी १८.५५) इति। एवं-भूतो ब्रह्म-निष्ठो मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं पराम् उत्तमां ज्ञान-लक्षणां चतुर्थीं लभते चतुर्विधा भजन्ते माम् (गी ७.१६) इति ह्युक्तम् ।। ५४ ।।

ततो ज्ञान-लक्षणया -

**भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।**

**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।। १८.५५ ।।**

भक्त्येति। भक्त्या मामभिजानाति यावान् अहमुपाधि-कृत-विस्तर-भेदो यश्च अहं विध्वस्त-सर्वोपाधि-भेद उत्तम-पुरुष आकाश-कल्पः तं मामद्वैतं चैतन्य-मात्रैक-रसं अजमजरममरमभयमनिधनं तत्त्वतः अभिजानाति। ततो माम् एवं तत्त्वतो ज्ञात्वा विशते तदनन्तरं मामेव।

नात्र ज्ञानानन्तर-प्रवेश-क्रिये भिन्ने विवक्षिते ज्ञात्वा विशते तदनन्तरम्इति।

किं तर्हि फलान्तराभावात् ज्ञान-मात्रमेव। क्षेत्रज्ञं चापि मां विद्धि (गी १३.२) इत्युक्तत्वात्।।

**आक्षेपः**

ननु विरुद्धमिदमुक्तं ज्ञानस्य या परा निष्ठा तया मामभिजानातिइति। कथं विरुद्धमिति चेदुच्यते - यदैव यस्मिन् विषये ज्ञानमुत्पद्यते ज्ञातुः तदैव तं विषयमभिजानाति ज्ञातेति न ज्ञान-निष्ठां ज्ञानावृत्ति-लक्षणामपेक्षते इति। अतश्च ज्ञानेन नाभिजानाति ज्ञानवृत्त्या तु ज्ञाननिष्ठयाभिजानाति इति[18]।

**समाधानम्**

नैष दोषः। ज्ञानस्य स्वात्मोत्पत्ति-परिपाक-हेतु-युक्तस्य प्रति-पक्ष-विहीनस्य यदात्मानुभव-निश्चयावसानत्वं तस्य निष्ठा-शब्दाभिलापात् शास्त्राचार्योपदेशेन ज्ञानोत्पत्ति-परिपाक-हेतुं सहकारि-कारणं बुद्धि-विशुद्ध्याद्यमानित्वादि चापेक्ष्य जनितस्य क्षेत्रज्ञ-परमात्मैकत्व-ज्ञानस्य कर्तृत्वादि-कारक-भेद-बुद्धि-निबन्धन-सर्व-कर्म-संन्यास-सहितस्य स्वात्मानुभव-निश्चय-रूपेण यदवस्थानं सा परा ज्ञान-निष्ठेत्युच्यते। सेयं ज्ञान-निष्ठा आर्त्तादि-भक्ति-त्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता। तया परया भक्त्या भगवन्तं तत्त्वतोऽभिजानाति। यदनन्तरमेव ईश्वर-क्षेत्रज्ञ-भेद-बुद्धिरशेषतो निवर्त्तते। अतो ज्ञान-निष्ठा-लक्षणया

---

18 विरुद्धमिति शेषः।

भक्त्या मामभिजानातीति वचनं न विरुध्यते।।

अत्र च सर्वं निवृत्ति-विधायि शास्त्रं वेदान्तेतिहास-पुराण-स्मृति-लक्षणं न्याय-प्रसिद्धं अर्थवद्भवति, विदित्वा व्युत्थायाथ भिक्षाचर्यं चरन्ति (बृ. ३.५.१), तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः (म.ना. २४.१), न्यास एवात्यरेचयत् (म.ना. २१.२), इति। संन्यासः कर्मणां न्यासः, वेदान्, इमं च लोकम्, अमुं च परित्यज्य(आ.ध.सू २.२३.१३), त्यज धर्ममधर्मं च (म.भा.शां. ३२९.४०) इत्यादि। इह च प्रदर्शितानि वाक्यानि। न च तेषां वाक्यानामानर्थक्यं युक्तम्। न चार्थवादत्वं स्व-प्रकरणस्थत्वात्। प्रत्यगात्माविक्रिय-स्वरूप-निष्ठत्वाच्च मोक्षस्य। न हि पूर्व-समुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्र-जिगमिषुणा समान-मार्गत्वं सम्भवति। प्रत्यगात्म-विषय-प्रत्यय-सन्तान-करणाभिनिवेशश्च ज्ञाननिष्ठा। सा च प्रत्यक्समुद्र-गमनवत्कर्मणा सहभावित्वेन विरुध्यते। पर्वत-सर्षपयोः इव अन्तरवान् विरोधः प्रमाण-विदां निश्चितः। तस्मात् सर्व-कर्म-संन्यासेनैव ज्ञान-निष्ठा कार्या इति सिद्धम्।। ५५ ।।

स्व-कर्मणा भगवतोऽभ्यर्चन-भक्ति-योगस्य सिद्धिप्राप्तिः फलं ज्ञान-निष्ठा-योग्यता। यन्निमित्ता ज्ञान-निष्ठा मोक्ष-फलावसाना। स भगवद्भक्ति-योगोऽधुना स्तूयते शास्त्रार्थोप-संहार-प्रकरणे शास्त्रार्थ-निश्चय-दाढर्याय

-

**सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।**

**मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्।। १८.५६ ।।**

सर्वकर्माणीति। सर्वकर्माणि प्रतिषिद्धानि अपि सदा कुर्वाणः अनुतिष्ठन् मद्व्यपाश्रयः अहं वासुदेव ईश्वरो व्यपाश्रयो व्यपाश्रयणं यस्य स मद्व्यपाश्रयः मय्यर्पित-सर्वात्म-भाव इत्यर्थः।

सोऽपि मत्प्रसादाद् ममेश्वरस्य प्रसादाद् अवाप्नोति शाश्वतं नित्यं वैष्णवं पदमव्ययम्।। ५६।।

यस्मादेवं तस्मात् -

**चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।**

**बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव।। १८.५७ ।।**

चेतसेति। चेतसा विवेक-बुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयि ईश्वरे संन्यस्य यत्करोषि यदश्नासि (गी ९.२७) इत्युक्त-न्यायेन मत्परः अहं वासुदेवः परो यस्य तव स त्वं मत्परः मय्यर्पित-सर्वात्म-भावः सन् बुद्धियोगं मयि समाहित-बुद्धित्वं बुद्धि-योगः तं बुद्धि-योगम् उपाश्रित्य उपाश्रयोऽनन्य-शरणत्वं[19] मच्चित्तः मय्येव चित्तं यस्य तव स त्वं मच्चित्तः सततं सर्वदा भव।। ५७ ।।

[19] बुद्धियोगमपाश्रित्य अपाश्रयः अनन्यशरणत्वमिति पाठान्तरम्। मूलं महाभारते उपाश्रित्येत्येव दृश्यते।

**मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।**

**अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि।। १८.५८ ।।**

मच्चित्त इति। मच्चित्तः सर्वदुर्गाणि सर्वाणि दुस्तराणि संसार-हेतु-जातानि मत्प्रसादात् तरिष्यसि अतिक्रमिष्यसि। अथ चेत् यदि त्वं मदुक्तम् अहङ्कारात् पण्डितोऽहमिति न श्रोष्यसि न ग्रहीष्यसि ततस्त्वं विनङ्क्ष्यसि विनाशं गमिष्यसि।। ५८ ।।

इदं च त्वया न मन्तव्यं स्वतन्त्रोऽहं किमर्थं परोक्तं करिष्यामीति -

**यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।**

**मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति।। १८.५९ ।।**

यदहङ्कारमिति। यदि[20] चेत् त्वम् अहङ्कारमाश्रित्य न योत्स्य इति न युद्धं करिष्यामीति मन्यसे चिन्तयसि निश्चयं करोषि मिथ्यैष व्यवसायः निश्चयः ते तव यस्मात् प्रकृतिः क्षत्रिय-स्वभावः त्वां नियोक्ष्यति।। ५९ ।।

[20] भाष्यस्थ-यदि-शब्दाद् चेदित्यर्थसहिताद् मूलस्य यद्यहङ्कारमिति पाठान्तरमनुमीयते।

यस्माच्च -

**स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।**

**कर्त्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्।। १८.६० ।।**

स्वभावजेनेति। स्वभावजेन शोर्यादिना यथोक्तेन कौन्तेय निबद्धः निश्चयेन बद्धः स्वेन आत्मीयेन कर्मणा

कर्त्तुं नेच्छसि यत् कर्म, मोहाद् अविवेकतः करिष्यसि अवशोऽपि परवश एव तत् कर्म।। ६० ।।

यस्मात् -

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।**

**भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।। १८.६१ ।।**

ईश्वर इति। ईश्वरः ईशन-शीलो नारायणः सर्वभूतानां सर्व-प्राणिनां हृद्देशे हृदय-देशे अर्जुन शुक्लान्तरात्म-स्वभावो विशुद्धान्तः-करणः अहश्च कृष्णमहरर्जुनं च इति दर्शनात्। तिष्ठति स्थितिं लभते।

तेषु स कथं तिष्ठतीत्याह - भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यन्त्रारूढानि यन्त्राण्यारूढान्यधिष्ठितानि इव इति इव-शब्दोऽत्र द्रष्टव्यः। यथा दारु-कृत-पुरुषादीनि यन्त्रारूढानि।

मायया छद्मना भ्रामयन् तिष्ठतीति सम्बन्धः।। ६१ ।।

**तमेव शरणं गच्छ सर्वभावेन भारत।**

**तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।। १८.६२ ।।**

तमेवेति। तमेव ईश्वरं शरणम् आश्रयं संसारार्त्तिहरणार्थं गच्छ आश्रय सर्वभावेन सर्वात्मना हे भारत भरतान्वय। ततः तत्प्रसादात् ईश्वरानुग्रहात् परां प्रकृष्टां शान्तिं परामुपरतिं स्थानं च मम विष्णोः परमं पदम् अवाप्स्यसि शाश्वतं नित्यम्।। ६२ ।।

**इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।**

**विमृश्यैतदशेषेण यथेच्छसि तथा कुरु।। १८.६३ ।।**

इतीति। इति एतत् ते तुभ्यं ज्ञानमाख्यातं कथितं गुह्याद् गोप्याद् गुह्यतरम् अतिशयेन गुह्यं रहस्यमित्यर्थः।

मया सर्वज्ञेनेश्वरेण विमृश्य विमर्शनमालोचनं कृत्वा एतद् यथोक्तं शास्त्रम् अशेषेण समस्तं यथोक्तं चार्थजातं यथेच्छसि तथा कुरु।। ६३ ।।

भूयोऽपि मयोच्यमानं शृणु -

**सर्वगुह्यतमं भूयः श्रृणु मे परमं वचः।**

**इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्।। १८.६४ ।।**

सर्वगुह्यतममिति। सर्वगुह्यतमं सर्वगुह्येभ्योऽत्यन्त-गुह्यतमम् अत्यन्त-रहस्यमुक्तमप्यसकृद् भूयः पुनः श्रृणु मे मम परमं प्रकृष्टं वचः वाक्यम्।

न भयान्नाप्यर्थ-कारणाद्वा वक्ष्यामि, किं तर्हि, इष्टः प्रियोऽसि मे मम दृढम् अव्यभिचारेण इति कृत्वा ततः तेन कारणेन वक्ष्यामि कथयिष्यामि ते हितं परं ज्ञान-प्राप्ति-साधनम्। तद्धि सर्व-हितानां हिततमम्।। ६४ ।।

किं तदित्याह -

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।**

**मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे।। १८.६५ ।।**

मन्मना इति। मन्मना भव मच्चित्तो भव। मद्भक्तो भव मद्भजनो भव। मद्याजी मद्यजन-शीलो भव। मां नमस्कुरु नमस्कारमपि ममैव कुरु। तत्रैवं वर्त्तमानो वासुदेवे एव समर्पित-साध्य-साधन-प्रयोजनो मामेव एष्यसि आगमिष्यसि। सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां करोम्येतस्मिन् वस्तुनीत्यर्थः। यतः प्रियोऽसि मे। एवं भगवतः सत्य-प्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेरवश्यंभावि-मोक्ष-फलमवधार्य भगवच्छरणैक-परायणो भवेदिति वाक्यार्थः।। ६५ ।।

कर्म-योग-निष्ठायाः परम-रहस्यमीश्वर-शरणतामुपसंहृत्य अथेदानीं कर्म-योग-निष्ठा-फलं सम्यग्दर्शनं सर्व-वेदान्त-सार-विहितं वक्तव्यमित्याह -

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**

**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। १८.६६ ।।**

सर्वधर्मानिति। सर्वधर्मान् सर्वे च ते धर्माश्च सर्व-धर्मास्तान्। धर्म-शब्देनात्राधर्मोऽपि गृह्यते नैष्कर्म्यस्य विवक्षितत्वात्, नाविरतो दुश्चरितात् (कठ. १.२.२४) त्यज धर्ममधर्मं च (म.भा.शां ३२९.४०) इत्यादि-श्रुति-स्मृतिभ्यः। सर्व-धर्मान् परित्यज्य संन्यस्य सर्व-कर्माणीत्येतत्।

मामेकं सर्वात्मानं समं सर्व-भूतस्थमीश्वरमच्युतं गर्भ-जन्म-जरा-मरण-विवर्जितम् अहमेव इत्येवमेकं शरणं व्रज न मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः। अहं त्वा त्वाम् एवं-निश्चित-बुद्धिं सर्वपापेभ्यः सर्व-धर्माधर्म-बन्धन-रूपेभ्यो मोक्षयिष्यामि स्वात्म-भाव-प्रकाशी-करणेन।

उक्तं च - नाशयाम्यात्म-भावस्थो ज्ञान-दीपेन भास्वता (गी १०.११) इति।

अतो मा शुचः शोकं मा कार्षीरित्यर्थः।।

अस्मिन् गीताशास्त्रे परमनिःश्रेयससाधनं निश्चितं किं ज्ञानं, किं कर्म वा आहोस्विद् उभयमिति।

कुतः संशयः यज्ज्ञात्वाऽमृतमश्नुते (गी १३.१२) ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् (गी १८.५५) इत्यादीनि वाक्यानि केवलाज्ज्ञानाद् निःश्रेयस-प्राप्तिं दर्शयन्ति। कर्मण्येवाधिकारस्ते (गी २.४७) कुरु कर्मैव (गी ४.१५) इत्येवमादीनि कर्मणामवश्य-कर्त्तव्यतां दर्शयन्ति।

एवं ज्ञान-कर्मणोः कर्त्तव्यतोपदेशात् समुच्चितयोरपि निःश्रेयस-हेतुत्वं स्यादिति भवेत् संशयः कस्यचित्।

किं पुनरत्र मीमांसा-फलम्। ननु एतदेव एषामन्यतमस्य परम-निःश्रेयस-साधनत्वावधारणम्।

अतो विस्तीर्णतरं मीमांस्यमेतत्।।

आत्मज्ञानस्य तु केवलस्य निःश्रेयस-हेतुत्वं भेद-प्रत्यय-निवर्त्तकत्वेन कैवल्य-फलावसानत्वात्।

क्रिया-कारक-फल-भेद-बुद्धिरविद्ययाऽऽत्मनि नित्य-प्रवृत्ता। मम कर्म, अहं कर्त्ता,अमुष्मै फलायेदं कर्म करिष्यामिइतीयमविद्या अनादि-काल-प्रवृत्ता। अस्या अविद्याया निवर्त्तकम् अयमहमस्मि, केवलोऽकर्त्ताऽक्रियोऽफलः, न मत्तोऽन्योऽस्ति कश्चित् इत्येवं-रूपमात्म-विषयं ज्ञानमुत्पद्यमानं कर्म-प्रवृत्ति-हेतु-भूताया भेद-बुद्धेः निवर्त्तकत्वात्। तु-शब्दः पक्ष-द्वय-व्यावृत्त्यर्थः।

न केवलेभ्यः कर्मभ्यो न च ज्ञान-कर्मभ्यां समुच्चिताभ्यां निःश्रेयस-प्राप्तिरिति पक्ष-द्वयं निवर्त्तयति।

अकार्यत्वाच्च निःश्रेयसस्य कर्म-साधनत्वानुपपत्तिः। न हि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते।।

**आक्षेपः**

केवलज्ञानमप्यनर्थकं तर्हि।।

**समाधानम्**

न, अविद्या-निवर्त्तकत्वे सति दृष्ट-कैवल्य-फलावसानत्वात्।

अविद्या-तमो-निवर्त्तकस्य ज्ञानस्य दृष्टं कैवल्य-फलावसानत्वम्।

रज्ज्वादि-विषये सर्पाद्यज्ञान-तमो-निवर्त्तक-प्रदीप-प्रकाश-फलवत्।

विनिवृत्त-सर्पादि-विकल्प-रज्जु-कैवल्यावसानं हि प्रकाश-फलं[21], तथा ज्ञानम्।

दृष्टार्थानां च च्छिदि-क्रियाग्नि-मन्थनादीनां व्यापृत-कर्त्रादि-कारकाणां द्वैधी-भावाग्नि-दर्शनादि-फलादन्य-फले कर्मान्तरे वा व्यापारानुपपत्तिर्यथा, तथा दृष्टार्थायां ज्ञान-निष्ठा-क्रियायां व्यापृतस्य ज्ञात्रादि-कारकस्याऽऽत्मकैवल्य-फलादन्य-फले कर्मान्तरे प्रवृत्तिरनुपपन्नेति न ज्ञान-निष्ठा कर्म-सहितोपपद्यते।।

**आक्षेपः**

भुज्यग्निहोत्रादि-क्रियावत्स्यादिति चेत्।।

**समाधानम्**

न, कैवल्य-फले ज्ञाने क्रिया-फलार्थित्वानुपपत्तेः।

कैवल्य-फले हि ज्ञाने प्राप्ते सर्वतः-सम्प्लुतोदके फले कूप-तडागादि-क्रिया-फलार्थित्वाभाववत्।

फलान्तरे तत्साधन-भूतायां वा क्रियायामर्थित्वानुपपत्तिः।

---

[21] विशेषेण-निवृत्त-दण्डसर्पादिविकल्पाः यस्याः सा रज्जुः विनिवृत्त-सर्पादि-विकल्प-रज्जुः तस्याः केवलरज्जुरूपेणावस्थानं तदेव प्रकाशस्य फलमिति।

न हि राज्य-प्राप्ति-फले कर्मणि व्यापृतस्य क्षेत्र-मात्र-प्राप्ति-फले व्यापारोपपत्तिः तद्विषयं वा अर्थित्वम्।

तस्मान्न कर्मणोऽस्ति निःश्रेयस-साधनत्वम्। न च ज्ञान-कर्मणोः समुच्चितयोः।

नापि ज्ञानस्य कैवल्य-फलस्य कर्म-साहाय्यापेक्षा अविद्या-निवर्त्तकत्वेन विरोधात्।

न हि तमस्तमसो निवर्त्तकम्। अतः केवलमेव ज्ञानं निःश्रेयस-साधनम् इति।।

**पूर्वमीमांसा-खण्डनम् -**
**पूर्वपक्षिणः आक्षेपः**

न, नित्याकरणे प्रत्यावाय-प्राप्तेः। कैवल्यस्य च नित्यत्वात्।

यत्तावत् केवल-ज्ञानात् कैवल्य-प्राप्तिरित्येतत् तदसत्।

यतो नित्यानां कर्मणां श्रुत्युक्तानामकरणे प्रत्यवायो नरकादि-प्राप्ति-लक्षणः स्यात्।

**सिद्धान्तिनः प्रत्याक्षेपः**

ननु एवं तर्हि[22] कर्मभ्यो मोक्षो नास्तीत्यनिर्मोक्ष एव।

---

[22] कैवल्यस्य नित्यत्वात् इति हेतुः।

**पूर्वपक्षिणः समाधानम्**

नैष दोषः। नित्यत्वान्मोक्षस्य। नित्यानां कर्मणामनुष्ठानात् प्रत्यवायस्याप्राप्तिः।

प्रतिषिद्धस्य चाकरणादनिष्ट-शरीरानुपपत्तिः। काम्यानां च वर्जनाद् इष्ट-शरीरानुपपत्तिः।

वर्त्तमान-शरीरारम्भकस्य च कर्मणः फलोपभोग-क्षये पतितेऽस्मिन् शरीरे देहान्तरोत्पत्तौ च

कारणाभावात्, आत्मनो रागादीनां चाकरणात्, स्वरूपावस्थानमेव कैवल्यमित्ययत्न-सिद्धं

कैवल्यमिति।।

**सिद्धान्तिनः प्रत्याक्षेपः**

अतिक्रान्तानेक-जन्मान्तर-कृतस्य स्वर्ग-नरकादि-प्राप्ति-फलस्य अनारब्ध-कार्यस्योपभोगानुपपत्तेः

क्षयाभाव इति चेत्।।

**पूर्वपक्षिणः समाधानम्**

न, नित्य-कर्मानुष्ठानायास-दुःखोपभोगस्य तत्फलोप-भोगत्वोपपत्तेः।

प्रायश्चित्तवद्वा पूर्वोपात्त-दुरित-क्षयार्थत्वात् नित्य-कर्मणाम्।

आरब्धानां च कर्मणामुपभोगेनैव क्षीणत्वात्, अपूर्वाणां च कर्मणामनारम्भे अयत्न-सिद्धं कैवल्यमिति।।

**सिद्धान्तिनः खण्डनम्**

न, तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय (श्वे. ३.८) इति विद्याया अन्यः पन्था मोक्षाय न विद्यते इति श्रुतेः, चर्मवदाकाश-वेष्टनासम्भववद् अविदुषो मोक्षासम्भव-श्रुतेः, ज्ञानात्कैवल्यमाप्नोतीति च पुराण-स्मृतेः। अनारब्ध-फलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च। यथा पूर्वोपात्तानां दुरितानामनारब्ध-फलानां सम्भवः तथा पुण्यानामप्यनारब्ध-फलानां स्यात् सम्भवः। तेषां च देहान्तरमकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः। धर्माधर्म-हेतूनां च राग-द्वेष-मोहानाम् अन्यत्रात्म-ज्ञानादुच्छेदानुपपत्तेः धर्माधर्मोच्छेदानुपपत्तिः। नित्यानां च कर्मणां पुण्य-लोक-फलत्व-श्रुतेः, वर्णा आश्रमाश्च स्व-कर्म-निष्ठाः (आप. २.२.२.३) इत्यादि-स्मृतेश्च कर्म-क्षयानुपपत्तिः।।

ये त्वाहुः - नित्यानि कर्माणि दुःख-स्वरूपत्वात् पूर्व-कृत-दुरित-कर्मणां फलमेव, न तु तेषां स्वरूप-व्यतिरेकेणाऽन्यत्फलमस्ति, अश्रुतत्वात्, जीवनादि-निमित्ते च विधानादिति।

न, अप्रवृत्तानां कर्मणां फलदानासम्भवात्, दुःख-फल-विशेषानुपपत्तिश्च स्यात्।

यदुक्तं पूर्व-जन्म-कृत-दुरितानां कर्मणां फलं नित्य-कर्मानुष्ठानायास-दुःखं भुज्यते इति तदसत्।

न हि मरण-काले फल-दानाय अनङ्कुरी-भूतस्य कर्मणः फलमन्य-कर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिः।

अन्यथा स्वर्ग-फलोपभोगाय अग्निहोत्रादि-कर्मारब्धे जन्मनि नरक-कर्म-फलोपभोगानुपपत्तिर्न स्यात्[23]।।

तस्य[24] दुरितस्य दुःख-विशेष-फलत्वानुपपत्तेश्च। अनेकेषु हि दुरितेषु सम्भवत्सु भिन्न-दुःख-साधन-फलेषु नित्य-कर्मानुष्ठानायास-दुःख-मात्र-फलेषु कल्प्यमानेषु द्वन्द्व-रोगादि-बाधनं निर्निमित्तं न हि शक्यते कल्पयितुं, नित्य-कर्मानुष्ठानायास-दुःखमेव पूर्वकृत-दुरित-फलं, न शिरसा पाषाण-वहनादि-दुःखमिति।

अप्रकृतं चेदमुच्यते - नित्य-कर्मानुष्ठानायास-दुःखं पूर्व-कृत-दुरित-कर्म-फलमिति।

---

[23] केनचिद् अग्निहोत्रादिधर्मः कृतः अधर्मश्च। तत्राङ्कुरीभूतात् धर्मफलाद् देवजन्मनि सति तत्रैवाधर्मफलं नरकमपि तेन भुज्येत। अनुपपत्तिः न स्यादित्यस्यार्थः आपत्तिः स्यादिति।

[24] नित्यकर्मानुष्ठानायासदुःखस्येत्यर्थः

कथम् अप्रसूत-फलस्य हि पूर्व-कृत-दुरितस्य क्षयो नोपपद्यते इति प्रकृतम्।

तत्र प्रसूत-फलस्य कर्मणः फलं नित्य-कर्मानुष्ठानायास-दुःखमाह भवान् नाप्रसूतफलस्य इति।

अथ सर्वमेव पूर्वकृतं दुरितं प्रसूत-फलमेवेति मन्यते भवान् ततो नित्य-कर्मानुष्ठानायास-दुःखमेव फलमिति विशेषणमयुक्तम्।

नित्य-कर्म-विध्यानर्थक्य-प्रसङ्गश्च, उपभोगेनैव प्रसूत-फलस्य दुरित-कर्मणः क्षयोपपत्तेः।।

किञ्च श्रुतस्य नित्यस्य दुःखं कर्मणः चेत् फलं, नित्य-कर्मानुष्ठानायासादेव तद् दृश्यते व्यायामादिवत् तदन्यस्य[25] इति कल्पनानुपपत्तिः। जीवनादि-निमित्ते च विधानाद् नित्यानां कर्मणाम्।

प्रायश्चित्तवत्पूर्व-कृत-दुरित-फलत्वानुपपत्तिः।

[25] पूर्वकृतदुरितस्य।

यस्मिन् पाप-कर्मणि निमित्ते यद्विहितं प्रायश्चित्तं न तु तस्य पापस्य तत्फलम्[26]।

अथ तस्यैव पापस्य निमित्तस्य प्रायश्चित्त-दुःखं[27] फलं, जीवनादि-निमित्तमपि नित्य-कर्मानुष्ठानायास-दुःखं जीवनादि-निमित्तस्यैव तत्फलं प्रसज्येत, नित्य-प्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात्।

किञ्चान्यत्। नित्यस्य काम्यस्य च अग्निहोत्रादेः [28] अनुष्ठानायास-दुःखस्य तुल्यत्वाद् नित्य-कर्मानुष्ठानायास-दुःखमेव पूर्व-कृत-दुरितस्य फलं, न तु काम्यानुष्ठानायास-दुःखम् इति विशेषो नास्तीति तदपि पूर्व-कृत-दुरित-फलं प्रसज्येत। तथा च सति नित्यानां फलाश्रवणात् तद्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायास-दुःखं पूर्व-कृत-दुरित-फलम् इत्यर्थापत्ति-कल्पना चानुपपन्ना[29]।

एवं विधानान्यथानुपपत्तेः अनुष्ठानायास-दुःख-व्यतिरिक्त-फलत्वानुमानाच्च नित्यानाम्।।

---

[26] चान्द्रायणादिकम् अभोज्यभोजनादिरूपपापस्य फलं न भवति।

[27] प्रायश्चित्तानुष्ठानायासदुःखम्।

[28] वसन्ते वसन्ते ज्योतिषा यजेत इति विहितो नित्य एव ज्योतिष्टोमः ज्योतिष्टोमेन स्वर्गकामो यजेत इति स्वर्गकामिना अनुष्ठीयमानस्सन् काम्यो भवति। (रामरायकविः)

[29] सफलकाम्यकर्मानुष्ठानजन्यदुखस्यापि पूर्वकृतदुरितफलत्वेन, निष्फलनित्यकर्मानुष्ठानजन्यदुखमेव पूर्वकृतदुरितफलमिति वक्तुमशक्यत्वात्।

विरोधाच्च। विरुद्धं चेदमुच्यते - नित्य-कर्मण्यनुष्ठीयमानेऽन्यस्य [30] कर्मणः फलं भुज्यते इत्यभ्युपगम्यमाने स एवोपभोगो नित्यस्य कर्मणः फलमिति, नित्यस्य कर्मणः फलाभाव इति च, विरुद्धमुच्यते।।

किञ्च काम्याग्नि-होत्रादावनुष्ठीयमाने नित्यमप्यग्निहोत्रादि तन्त्रेणैवानुष्ठितं भवतीति[31] तदायास-दुःखेनैव काम्याग्नि-होत्रादि-फलमुपक्षीणं स्यात् तत्तन्त्रत्वात्।

अथ काम्याग्नि-होत्रादि-फलमन्यदेव स्वर्गादि तदनुष्ठानायास-दुःखमपि भिन्नं प्रसज्येत।

न च तदस्ति दृष्ट-विरोधात्। न हि काम्यानुष्ठानायास-दुःखात् केवल-नित्यानुष्ठानायास-दुःखं भिन्नं दृश्यते।।

---

[30] नित्यकर्मणाऽनुष्ठीयमानेन अन्यस्य इति पाठान्तरम्।

[31] उभयोः कामांशभावाभावत्वे एव विशेषः, तदरिक्तस्सर्वोप्यविशिष्ट इति कृत्वा काम्येऽनुष्ठीयमाने सति नित्योऽप्यनुष्ठित एव।

किञ्चान्यद् अविहितमप्रतिषिद्धं च कर्म[32] तत्काल-फलं, न तु शास्त्र-चोदितं प्रतिषिद्धं वा तत्काल-फलम्। भवेद्यदि तदा स्वर्गादिष्वप्यदृष्ट-फल-शासने चोद्यमो न स्यात्।

अग्निहोत्रादीनामेव कर्म-स्वरूपाविशेषेऽनुष्ठानायास-दुःखमात्रेणोपक्षयो नित्यानां, स्वर्गादि-महा-फलत्वं काम्यानां, अङ्गेतिकर्त्तव्यताद्याधिक्ये त्वसति, फल-कामित्व-मात्रेणेति न शक्यं कल्पयितुम्।

तस्मान्न नित्यानां कर्मणामदृष्ट-फलाभावः कदाचिदप्युपपद्यते।

अतश्चाविद्या-पूर्वकस्य कर्मणो विद्यैव शुभस्याशुभस्य वा क्षय-कारणमशेषतो न नित्य-कर्मानुष्ठानम्।।

अविद्या-काम-बीजं हि सर्वमेव कर्म। तथा चोपपादितम्।

अविद्वद्विषयं कर्म, विद्वद्विषया च सर्व-कर्म-संन्यास-पूर्विका ज्ञान-निष्ठा।

उभो तौ न विजानीतः (गी २.१९), वेदाविनाशिनं नित्यम् (गी २.२१), ज्ञान-योगेन साङ्ख्यानां कर्म-योगेन योगिनाम्(गी ३.३), अज्ञानां कर्म-सङ्गिनाम्(गी ३.२६), तत्त्ववित्तु महाबाहो....गुणा गुणेषु वर्त्तन्ते

[32] व्यायामादि लौकिकं कर्म शास्त्रेणाविहितं कर्म समकालदृष्टफलकम्।

इति मत्वा न सज्जते (गी ३.२८), सर्व-कर्माणि मनसा संन्यस्यास्ते (गी ५.१३), नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् (गी ५.८) अर्थादज्ञः करोमीति। आरुरुक्षोः कर्म कारणमारूढस्य योगस्थस्य शम एव कारणम् (गी ६.३)। उदारास्त्रयोऽप्यज्ञाः, ज्ञानीत्वात्मैव मे मतम् (७.१८)। अज्ञाः कर्मिणो गतागतं कामकामा लभन्ते (गी ९.२१)। अनन्याश्चिन्तयन्तो मां नित्ययुक्ता यथोक्तमात्मानम् आकाश-कल्पकमकल्मषमुपास्ते (गी ९.२२)। ददामि बुद्धि-योगं तं येन मामुपयान्ति ते (गी १०.१०)।

अर्थान्न कर्मिणोऽज्ञा उपयान्ति।

भगवत्कर्म-कारिणो ये युक्ततमा अपि कर्मिणोऽज्ञाः ते उत्तरोत्तर-हीन-फल-त्यागावसान-साधनाः।

अनिर्देश्याक्षरोपासकास्तु अद्वेष्टा सर्वभूतानाम्(गी १२.१३) इत्यध्याय-परि-समाप्त्युक्त-साधनाः[33], क्षेत्राध्यायादि-अध्याय-त्रयोक्त-ज्ञान-साधनाश्च[34]।

---

[33] अद्वेष्टा... इत्यारभ्य अध्यायपरिसमाप्तिपर्यन्तमुक्तानि मैत्रकरुणादि।

[34] अमानित्वादि (१३), न द्वेष्टि सम्प्रवृत्तानि.. इत्यादीनि (१४), निर्मानमोहाः.. इत्यादीनि च (१५).

अधिष्ठानादि-पञ्च-हेतुक-सर्व-कर्म-संन्यासिनाम् आत्मैकत्वाकर्त्तृत्व-ज्ञानवतां परस्यां ज्ञान-निष्ठायां वर्त्तमानानां भगवत्तत्त्व-विदामनिष्टादि-कर्म-फल-त्रयं परम-हंस-परिव्राजकानामेव लब्ध-भगवत्स्वरूपात्मैकत्व-शरणानां न भवति, भवत्येव अन्येषामज्ञानां कर्मिणामसंन्यासिनां इत्येष गीताशास्त्रोक्तस्य कर्त्तव्याकर्त्तव्यार्थस्य विभागः।।

**आक्षेपः**

अविद्या-पूर्वकत्वं सर्वस्य कर्मणोऽसिद्धमिति[35] चेत्।

**समाधानम्**

न ब्रह्म-हत्यादिवत्। यद्यपि शास्त्रावगतं नित्यं कर्म, तथाप्यविद्यावत एव भवति। यथा प्रतिषेध-शास्त्रावगतमपि ब्रह्म-हत्यादि-लक्षणं[36] कर्मानर्थ-कारणमविद्या-कामादि-दोषवतो भवति, अन्यथा[37] प्रवृत्त्यनुपपत्तेः। तथा नित्य-नैमित्तिक-काम्यान्यपि इति।।

---

[35] शास्त्रादवगतं कर्म विद्यापूर्वकमेवेति शङ्कते।

[36] प्रतिषेधशास्त्रावगतब्रह्महत्यादीनामपि विद्यापूर्वकनित्यानामिव अनुष्ठानान्मोक्षप्रसङ्गात्। तस्मात् शास्त्रावगत-मात्रत्वं विद्यापूर्वकत्वे न हेतुः किन्तु विद्याविषयत्मेव।

[37] उक्तदोषाभावे।

**आक्षेपः**

देह-व्यतिरिक्तात्मन्यज्ञाते प्रवृत्तिर्नित्यादि-कर्मसु अनुपपन्नेति चेत्।।

**समाधानम्**

न चलनात्मकस्य कर्मणः अनात्म-कर्त्तृकस्य अहं करोमि इति प्रवृत्ति-दर्शनात्।।

**आक्षेपः**

देहादि-सङ्घातेऽहंप्रत्ययो गौणो, न मित्या इति चेत्।।

**समाधानम्**

न, तत्कार्येष्वपि गौणत्वोपपत्तेः।।

**आक्षेपस्य विवरणम्**

आत्मीये देहादि-सङ्घातेऽहंप्रत्ययो गौणो, यथाऽऽत्मीये पुत्रे आत्मा वै पुत्र नामासि (तै.सं. २.११) इति, लोके चापि मम प्राण एवायं गौः इति तद्वत्। नैवायं मिथ्या-प्रत्ययः। मिथ्या-प्रत्ययस्तु स्थाणु-पुरुषयोरगृह्यमाणाविशेषयोः।।

**समाधानस्य विवरणम्**

न गौण-प्रत्ययस्य मुख्य-कार्यार्थत्वम्[38]। अधिकरण-स्तुत्यर्थत्वाल्लुप्तोपमा-शब्देन[39]।

यथा सिंहो देवदत्तोऽग्निर्माणवक इति। सिंह इव अग्निः इव क्रौर्य-पैंगल्यादि-सामान्यवत्त्वाद् देवदत्त-माणवकाधिकरण-स्तुत्यर्थमेव, न तु सिंह-कार्यम् अग्निकार्यं वा गौण-शब्द-प्रत्यय-निमित्तं किञ्चित् साध्यते, मिथ्या-प्रत्यय-कार्यं त्वनर्थमनुभवति[40] इति। गौण-प्रत्यय-विषयं च जानाति, नैष सिंहो देवदत्त स्यात् नायमग्निर्माणवकः इति। तथा गोणेन देहादि-संघातेनाऽऽत्मना कृतं कर्म न मुख्येनाहं-प्रत्यय-विषयेणात्मना कृतं स्यात्। न हि गोण-सिंहाग्निभ्यां कृतं कर्म मुख्य-सिंहाग्निभ्यां कृतं स्यात्।

न च क्रौर्येण पैंगल्येन वा मुख्य-सिंहाग्न्योः कार्यं किञ्चित् क्रियते, स्तुत्यर्थत्वेनोपक्षीणत्वात्।

स्तूयमानौ च जानीतो नाहं सिंहो, नाहमग्निःइति। न हि सिंहस्य कर्म ममाग्नेश्च इति। तथा न सङ्घातस्य कर्म मम मुख्यस्यात्मनः इति प्रत्ययो युक्ततरः स्यात्, न पुनः अहं कर्त्ता, मम कर्म इति।।

---

[38] प्रकृते तु देहादिसङ्घातकृतं कर्म स्वेनैव कृतं मुख्यं कर्म इति प्रत्येति पुरुषः।

[39] प्रतीयमानस्य गौणप्रयोगस्य इति शेषः।

[40] मिथ्याप्रत्ययविषयसङ्घातकार्येषु मुख्यात्मकार्यत्वं मिथ्याप्रत्ययिनोऽनुभवसिद्धम्।

यच्चाहुः आत्मीयैः स्मृतीच्छा-प्रयत्नैः कर्म-हेतुभिः आत्मा कर्म करोतीति।

न, तेषां मिथ्या-प्रत्यय-पूर्वकत्वाद्, मिथ्या-प्रत्यय-निमित्तेष्टानिष्टानुभूत-क्रिया-फल-जनित-संस्कार-पूर्वका हि स्मृतीच्छा-प्रयत्नादयः। यथा अस्मिन् जन्मनि देहादि-सङ्घाताभिमान-राग-द्वेषादि-कृतौ धर्माधर्मौ तत्फलानुभवश्च, तथाऽतीतेऽतीततरेऽपि जन्मनि इत्यनादिरविद्याकृतः संसारोऽतीतोऽनागतश्चानुमेयः।

ततश्च सर्व-कर्म-संन्यास-सहित-ज्ञान-निष्ठायाम् आत्यन्तिकः संसारोपरम इति सिद्धम्।।

अविद्यात्मकत्वाच्च देहाभिमानस्य, तन्निवृत्तौ देहानुपपत्तेः संसारानुपपत्तिः।

देहादि-सङ्घाते आत्माभिमानोऽविद्यात्मकः।

न हि लोके गवादिभ्योऽन्योहं, मत्तश्चान्ये गवादयः इति जानन् तेषु अहम्इति मन्यते कश्चित्।

अजानंस्तु स्थाणौ पुरुष-विज्ञानवदविवेकतो देहादि-सङ्घाते कुर्याद् अहम् इति प्रत्ययं, न विवेकतो जानन्।।

यस्तु आत्मा वै पुत्र नामासि इति पुत्रेऽहं प्रत्ययः, स तु जन्य-जनक-सम्बन्ध-निमित्तो गौणः।

गौणेन चात्मना भोजनादिवत् परमार्थ-कार्यं न शक्यते कर्त्तुं, गोण-सिंहाग्निभ्यां मुख्य-सिंहाग्नि-कार्यवत्।

**आक्षेपः**

अदृष्ट-विषय-चोदना-प्रामाण्यादात्म-कर्त्तव्यं गौणैर्देहेन्द्रियादिभिः क्रियते[41] एव इति चेत्।।

**समाधानम्**

न, अविद्या-कृतात्मकत्वात्तेषाम्। न च गौणा आत्मनो देहेन्द्रियादयः।

किं तर्हि मिथ्या-प्रत्ययेनैव अनात्मानः सन्तः असङ्गस्यात्मनः सङ्गत्या आत्मत्वपापद्यन्ते।

तद्भावे भावात् तदभावे चाभावात्[42]। अविवेकिनां ह्यज्ञान-काले बालानां दृश्यते दीर्घोऽहं गौरोऽहम्इति देहादि-सङ्घातेऽहं-प्रत्ययः।

न तु विवेकिनां अन्योऽहं देहादि-सङ्घातात् इति ज्ञानवतां तत्काले देहादि-सङ्घातेऽहं-प्रत्ययो भवति।

---

[41] स्वर्गादिषु या चोदना सा देहाद्यतिरिक्तात्मनो मुख्यात्मनो भवति। तत्कर्त्तव्यं कर्म देहादिभिर्गौणैरात्मभिः क्रियते। अन्यथा विधीनामप्रामाण्यं भवेत्।

[42] मिथ्याप्रत्ययभावे देहादीनामात्मभाव इत्यन्वयः।

तस्माद् मिथ्या-प्रत्ययाभावेऽभावात् तत्कृत एव न गोणः।

पृथग्गृह्यमाण-विशेष-सामान्ययोर्हि सिंह-देवदत्तयोरग्निमाणवकयोर्वा गोणः प्रत्ययः,

शब्द-प्रयोगो वा स्यात्। नाऽगृह्यमाण-सामान्य-विशेषयोः।।

यत्तूक्तं श्रुति-प्रामाण्यादिति। तन्न। तत्प्रामाण्यस्यादृष्ट-विषयत्वात्।

प्रत्यक्षादि-प्रमाणानुपलब्धे हि विषयेऽग्निहोत्रादि-साध्य-साधन-सम्बन्धे श्रुतेः प्रामाण्यं, न प्रत्यक्षादि-

विषयेऽदृष्ट-दर्शनार्थ-विषयत्वात्प्रामाण्यस्य।

तस्मान्न दृष्ट-मिथ्या-ज्ञान-निमित्तस्याहं-प्रत्ययस्य देहादि-सङ्घाते गौणत्वं कल्पयितुं शक्यम्।

न हि श्रुति-शतमपि शीतोऽग्निरप्रकाशः वेति ब्रुवत्प्रामाण्यमुपैति। यदि ब्रूयात् शीतोऽग्निरप्रकाशः वेति

तथाप्यर्थान्तरं श्रुतेर्विवक्षितं कल्प्यं प्रामाण्यान्यथानुपपत्तेः।

न तु प्रमाणान्तर-विरुद्धं स्व-वचन-विरुद्धं वा।।

**आक्षेपः**

कर्मणो मिथ्या-प्रत्ययवत्कर्तृकत्वात् कर्तुरभावे श्रुतेरप्रामाण्यमिति चेत्।।

**समाधानम्**

न, ब्रह्म-विद्यायामर्थवत्वोपपत्तेः।।

**आक्षेपः**

कर्म-विधि-श्रुतिवत् ब्रह्म-विद्या-विधि-श्रुतेरप्यप्रामाण्य-प्रसङ्ग इति चेत्।।

**समाधानम्**

न, बाधक-प्रत्ययानुपपत्तेः। यथा ब्रह्म-विद्या-विधि-श्रुत्याऽऽत्मन्यवगते देहादि-सङ्घातेऽहं-प्रत्ययो बाध्यते, तथा आत्मन्येवाऽऽत्मावगतिर्न कदाचित्केनचित् कथञ्चिदपि बाधितुं शक्या, फलाव्यतिरेकादवगतेः[43]। यथा अग्निरुष्णः प्रकाशश्चेति। न चैवं कर्म-विधि-श्रुतेरप्रामाण्यं पूर्व-पूर्व-प्रवृत्ति-निरोधेनोत्तरोत्तरापूर्व-प्रवृत्ति-जननस्य [44] प्रत्यग्-आत्माभिमुख्येन प्रवृत्त्युत्पादनार्थत्वात्। मिथ्यात्वेऽप्युपायस्योपेय-सत्यतया सत्यत्वमेव स्यात्।

---

[43] आत्मज्ञानस्य आत्मप्राप्तिरूपफलाभेदात्। (रामरायकविः)

[44] उपनीतस्य विवाहः, विवाहितस्य वैश्वदेवः, कृतवैश्वदेवस्याग्निहोत्राधानं, कृताधानस्याग्निष्टोमः कृताग्निष्टोमस्य चयनमित्येवं पूर्वपूर्वकर्मकृतवत उत्तरोत्तरं कर्म विदधाति। (रामरायकविः) अपूर्वेति विधिः।

यथा अर्थवादानां विधि-शेषाणाम्। लोकेऽपि बालोन्मत्तादीन् पय-आदौ पाययितव्ये चूडा-वर्धनादि-वचनम्। प्रकारान्तरस्थानां[45] च साक्षादेव वा प्रामाण्य-सिद्धिः प्रागात्म-ज्ञानाद् (प्राग्) देहाभिमान-निमित्त-प्रत्यक्षादि-प्रामाण्यवत्।।

यत्तु मन्यसे - स्वयमव्याप्रियमाणोऽप्यात्मा सन्निधि-मात्रेण करोति। तदेव च मुख्यं कर्त्तृत्वमात्मनः। यथा राजा युध्यमानेषु योधेषु युध्यत इति प्रसिद्धं, स्वयमयुध्यमानोऽपि सन्निधानादेव जितः पराजितश्चेति तथा सेनापतिर्वाचैव करोति, क्रिया-फल-सम्बन्धश्च राज्ञः सेनापतेश्च दृष्टः, यथा च ऋत्विक्कर्म यजमानस्य, तथा देहादीनां कर्म आत्म-कृतं स्यात् तत्फलस्यात्मगामित्वात्। यथा वा भ्रामकस्य लोह-भ्रामयितृत्वादव्यापृतस्यैव मुख्यमेव कर्तृत्वं तथा चाऽऽत्मनः -इति तदसत्। अकुर्वतः कारकत्व-प्रसङ्गात्।

---

[45] आत्मज्ञानोदयात्प्रागवस्थायां स्थितानां कर्मविधिश्रुतीनाम्। (रामरायकविः)

**आक्षेपः**

कारकमनेकप्रकारमिति चेत्।

**समाधानम्**

न, राज-प्रभृतीनां मुख्यस्यापि कर्त्तृत्वस्य दर्शनात्। राजा तावत् स्व-व्यापारेणापि युध्यते,

योधानां च योधयितृत्वेन, धन-दानेन च मुख्यमेव कर्तृत्वं, तथा जय-पराजय-फलोपभोगे।

तथा यजमानस्यापि प्रधान-त्यागेन[46] दक्षिणा-दानने च मुख्यमेव कर्तृत्वम्।

तस्मादव्यापृतस्य कर्त्तृत्वोपचारो यः स गौण इत्यवगम्यते।

यदि मुख्यं कर्त्तृत्वं स्व-व्यापार-लक्षणं नोपलभ्यते राज-यजमान-प्रभृतीनां तदा सन्निधि-मात्रेणाापि मुख्यं

परिकल्प्येत यथा भ्रामकस्य लोहभ्रमणेन। न तथा राज-यजमानादीनां स्वव्यापारो नोपलभ्यते।

तस्मात् सन्निधि-माणेणापि कर्त्तृत्वं गौणमेव। तथा च सति तत्फल-सम्बन्धोऽपि गौण एव स्यात्।

न गौणेन मुख्यं कार्यं निर्वर्त्यते।।

---

[46] प्रधानाहुतित्यागेन होमे।

तस्माद् असदेवैतद् गीयते देहादीनां व्यापारेणाव्यापृत एव आत्मा कर्त्ता भोक्ता च स्यादिति।

भ्रान्ति-निमित्तं तु सर्वमुपपद्यते। यथा स्वप्ने, मायायां चैवम्।

न च देहाद्यात्म-प्रत्यय-भ्रान्ति-सन्तान-विच्छेदेषु सुसुप्ति-समाध्यादिषु कर्त्तृत्व-भोक्तृत्वाद्यनर्थ उपलभ्यते।

तस्माद् भ्रान्ति-प्रत्यय-निमित्त एवायं संसार-भ्रमः, न तु परमार्थ इति सम्यग्दर्शनादत्यन्तमेवोपरम इति

सिद्धम्।। ६६ ।।

सर्व-गीता-शास्त्रार्थमुपसंहृत्य अस्मिन्नध्याये विशेषतश्चान्ते इह शास्त्रार्थ-दार्ढ्याय संक्षेपत उपसंहारं कृत्वा

अथेदानीं शास्त्र-सम्प्रदाय-विधिमाह -

**इदं ते नातपस्काय नाभक्ताय कदाचन।**

**न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति।। १८.६७ ।।**

इदमिति। इदं शास्त्रं ते तव हिताय मयोक्तं संसार-विच्छित्तये अतपस्काय तपो-रहिताय न वाच्यमिति व्यवहितेन सम्बध्यते। तपस्विनेऽपि अभक्ताय गुरु-देव-भक्ति-रहिताय कदाचन कस्याञ्चिदप्यवस्थायां न वाच्यम्। भक्तस्तपस्व्यपि सन् अशुश्रूषुः यो भवति तस्मा अपि न वाच्यम्।

न च यो मां वासुदेवं प्राकृतं मनुष्यं मत्वा अभ्यसूयति आत्म-प्रशंसादि-दोषाध्यारोपणेन ममेश्वरत्वमजानन् न सहते असावप्ययोग्यः। तस्मा अपि न वाच्यम्।

भगवत्यनसूया-युक्ताय तपस्विने भक्ताय शुश्रूषवे च वाच्यं शास्त्रमिति सामर्थ्याद् गम्यते।

तत्र मेधाविने तपस्विने वा इत्यनयोर्विकल्प-दर्शनात्[47] शुश्रूषा-भक्ति-युक्ताय तपस्विने तद्युक्ताय

मेधाविने वा वाच्यम्। शुश्रूषा-भक्ति-वियुक्ताय न तपस्विने नापि मेधाविने वाच्यम्।

भगवत्यसूया-युक्ताय समस्त-गुणवतेऽपि न वाच्यम्।

गुरु-शुश्रूषा-भक्तिमते च वाच्यमित्येष शास्त्र-सम्प्रदाय-विधिः।। ६७ ।।

---

[47] ग्रन्थान्तरे।

सम्प्रदायस्य कर्त्तुः फलमिदानीमाह -

**य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।**

**भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः।। १८.६८ ।।**

य इममिति। य इमं यथोक्तं परमं निःश्रेयसार्थं केशवार्जुनयोः संवाद-रूपं ग्रन्थं गुह्यं गोप्यं मद्भक्तेषु मयि भक्तिमत्सु अभिधास्यति वक्ष्यति ग्रन्थतोऽर्थतश्च स्थापयिष्यति इत्यर्थः, यथा त्वयि मया।

भक्तेः पुनर्ग्रहणाद् भक्ति-मात्रेण केवलेन शास्त्र-सम्प्रदाने पात्रं भवतीति गम्यते।

कथमभिधास्यतीत्युच्यते - भक्तिं मयि परां कृत्वा भगवतः परम-गुरोरच्युतस्य शुश्रूषा मया क्रियतेइत्येवं कृत्वेत्यर्थः।

तस्येदं फलं मामेवैष्यति मुच्यते एव। असंशयः अत्र संशयो न कर्त्तव्यः।। ६८ ।।

किञ्च -

**न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।**

**भविता न च मे तस्मादन्यः प्रियतरो भुवि।। १८.६९ ।।**

न चेति। न च तस्मात् शास्त्र-सम्प्रदाय-कृतो मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमः

अतिशयेन प्रिय-कृत् ततोऽन्यः प्रिय-कृत्तमः नास्त्येव इत्यर्थो वर्त्तमानेषु।

न च भविता भविष्यत्यपि काले तस्माद् द्वितीयः अन्यः प्रियतरः प्रिय-कृत्तरः भुवि लोकेऽस्मिन्।। ६९

।।

योऽपि -

**अध्येष्यते च य इमं धर्म्यं संवादमावयोः।**

**ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः।। १८.७० ।।**

अध्येष्यते इति। अध्येष्यते च पठिष्यति य इमं धर्म्यं धर्मादनपेतं संवाद-रूपं ग्रन्थम् आवयोः तेनेदं कृतं

स्यात् - ज्ञानयज्ञेन विधि-जपोपांशु-मानसानां यज्ञानां ज्ञान-यज्ञो मानसत्वाद् विशिष्टतम इत्यतस्तेन ज्ञान-

यज्ञेन गीता-शास्त्रस्याध्ययनं स्तूयते।

फल-विधिरेव वा। देवतादि-विषय-ज्ञान-यज्ञ-फल-तुल्यमस्य फलं भवतीति।

तेन अध्ययनेन अहमिष्टः पूजितः स्यां भवेयम् इति मे मम मतिः निश्चयः।। ७० ।।

अथ श्रोतुरिदं फलम् -

**श्रद्धावाननसूयश्च शृणुयादपि यो नरः।**

**सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात् पुण्यकर्मणाम्।। १८.७१ ।।**

श्रद्धावानिति। श्रद्धावान् श्रद्दधानः अनसूयश्च असूया-वर्जितः सन् इमं ग्रन्थं शृणुयाद् अपि यो नरः।

अपि-शब्दात् किमुत अर्थ-ज्ञानवान्।

सोऽपि पापाद् मुक्तः शुभान् प्रशस्तान् लोकान्प्राप्नुयात् पुण्यकर्मणाम् अग्निहोत्रादि-कर्मवताम्।। ७१ ।।

शिष्यस्य शास्त्रार्थ-ग्रहणाग्रहण-विवेक-बुभुत्सया पृच्छति।

तदग्रहणे ज्ञाते पुनः ग्राहयिष्याम्युपायान्तरेणापीति प्रष्टुरभिप्रायः।

यत्नान्तरमास्थाय शिष्यः कृतार्थः कर्त्तव्य इत्याचार्य-धर्मः प्रदर्शितो भवति -

**कच्चिदेतत् श्रुतं पार्थ त्वयैकाग्रेण चेतसा।**

**कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय।। १८.७२ ।।**

कच्चिदिति। कच्चित् किम् एतद् मयोक्तं श्रुतं श्रवणेनावधारितं पार्थ त्वयैकाग्रेण चेतसा चित्तेन,

किं वाऽप्रमादतः। कच्चिद् अज्ञानसम्मोहः अज्ञान-निमित्तः सम्मोहो विचित्त-भावोऽविवेकता स्वाभाविकः

किं प्रणष्टः यदर्थोऽयं शास्त्र-श्रवणायासः तव मम चोपदेष्टृत्वायासः प्रवृत्तः ते तव धनञ्जय।। ७२ ।।

**अर्जुन उवाच।**

**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।**

**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव।। १८.७३ ।।**

नष्ट इति। नष्टो मोहः अज्ञानजः समस्त-संसारानर्थ-हेतुः सागर इव दुस्तरः। स्मृतिः च आत्म-तत्त्व-विषया लब्धा यस्या लाभात्सर्व-ग्रन्थीनां विप्रमोक्षः। त्वत्प्रसादात् तव प्रसादाद् मया त्वत्प्रसादमाश्रितेन अच्युत। अनेन मोह-नाश-प्रश्न-प्रतिवचनेन सर्व-शास्त्रार्थ-ज्ञान-फलमेतावदेवेति निश्चितं दर्शितं भवति। यतो ज्ञानात् मोह-नाश आत्म-स्मृति-लाभश्चेति। तथा च श्रुतौ अनात्मवित् शोचामीत्युपन्यस्य आत्म-ज्ञानेन सर्व-ग्रन्थीनां विप्रमोक्ष उक्तः। भिद्यते हृदयग्रन्थिः (मु. २.२.८) तत्र को मोहः कः शोकः एकत्वमनुपश्यतः (ई. ७) इति च मन्त्र-वर्णः। अथेदानीं त्वच्छासने स्थितोऽस्मि गतसन्देहः मुक्त-संशयः। करिष्ये वचनं तव अहं त्वत्प्रसादात् कृतार्थः। न मम कर्त्तव्यमस्तीत्यभिप्रायः।। ७३ ।।

परिसमाप्तः शास्त्रार्थः। अथेदानीं कथा-सम्बन्ध-प्रदर्शनार्थं सञ्जय उवाच -

**सञ्जय उवाच।**

**इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।**

**संवादमिममश्रौषमद्भुतं रोमहर्षणम्।। १८.७४ ।।**

इत्यहमिति। इति एवम् अहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तम् अश्रौषं श्रुतवानस्मि अद्भुतम् अत्यन्त-विस्मयकरं रोमहर्षणं रोमाञ्चकरम्।। ७४ ।।

तं चेमम् -

**व्यासप्रसादात् श्रुतवान् इमं गुह्यतमं परम्।**

**योगं योगेश्वरात्कृष्णात्   साक्षात्कथयतः स्वयम्।। १८.७५।।**

व्यासेति। व्यासप्रसादात् ततो दिव्य-चक्षुर्लाभात् श्रुतवान् इमं संवादं गुह्यतमं परं योगं योगार्थत्वाद् ग्रन्थोऽपि योगः, संवादमिमं योगमेव वा योगेश्वरात्कृष्णात् साक्षात् कथयतः स्वयं न परम्परया।। ७५।।

**राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।**

**केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः।। १८.७६ ।।**

राजन्निति। हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।

केशवार्जुनयोः पुण्यम् इमं श्रवणादपि पाप-हरं श्रुत्वा हृष्यामि च मुहुर्मुहुः प्रति-क्षणम्।। ७६ ।।

**तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।**

**विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः।। १८.७७ ।।**

तच्चेति। तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः विश्व-रूपं विस्मयो मे महान् हे राजन् हृष्यामि च पुनः

पुनः।। ७७ ।।

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**

**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।। १८.७८ ।।**

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः।।

यत्रेति। यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानामीश्वरः तत्प्रभवत्वात् सर्व-योग-बीजश्च कृष्णो यत्र पार्थो यस्मिन् पक्षे धनुर्धरः गाण्डीव-धन्वा तत्र श्रीः, तस्मिन् पाण्डवानां पक्षे विजयः, तत्रेव भूतिः, श्रियो विशेषो विस्तारो भूतिः ध्रुवा अव्यभिचारिणी नीतिः नयः इत्येवं मतिर्मम इति।। ७८ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ

श्रीमद्भगवद्गीताभाष्ये अष्टादशोऽध्यायः।।